CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 874

Title Abhignāna Śākuntala.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 874 Subject: Nāṭaka

Title: Abhignāna śākuntala.

Author: Kālidāsa Scribe: Chātra Bhāṇā.

Date of the work: — Date of the Ms.: ~~1862~~ 1919 V.S.

Place of the work: — Place of the Ms.: Navinpur

Size: 11.1" by 4.1" Extent: 60 foll

Language: Sanskrit. Script: Devanāgarī

Remarks: —

शा०ना०॥

१

॥श्रीमन्निजप्रचंडदोर्दंडखंडितमृडकोदंडकांडायश्रीरामायनमः॥यासृष्टिःस्रष्टुराद्यावहतिविधि।
हुतंयाहविर्याचहोत्रीयेद्वेकालंविधत्तःश्रुतिविषयगुणायास्थिताव्याप्यविश्वं॥यामाहुःसर्वबीजप्रकृति
रितिययाप्राणिनःप्राणवंतःप्रत्यक्षाभिःप्रपन्नस्तनुभिरवतुवस्ताभिरष्टाभिरीशः॥१॥नांद्यंतेसूत्रधारः॥
नेपथ्याभिमुखमवलोक्य॥आर्येयदिनेपथ्यविधानमवसितंयदित्तावदागम्यतां॥प्रविश्यनटी॥अज्जउत्त
ह्मि॥आणवेदुअज्जोकोणिओओअणुचिट्ठीयदुत्ति॥सूत्रधारः॥आर्येअभिरूपभूयिष्ठापरिषदियं
अस्सांनुकालिदासग्रथितवस्तुनानवेनाभिज्ञानशाकुंतलाख्येननाटकेनोपस्थातव्यमस्माभिःतत्प्रतिपात्रमा
धीयतांयत्नः॥नटी॥सुविहिदप्पओयदाएअज्जस्सनकिंपिपरिहाइस्सदि॥सूत्र०॥आर्येकथयामिते १

/

भूतार्थं॥आपरितोषाद्विदुषांनसाधुमन्येप्रयोगविज्ञानं॥बलवदपिशिक्षितानामात्मन्यप्रत्ययंचेतः॥
॥२॥नटी॥एवंणेदं॥अणंतरकरणिज्जंदावअज्जोआणवेदु॥सूत्र०॥किमन्यदस्याःश्रुतिप्रसा
दहेतोःसंगीतादनंतरकरणीयमस्ति॥नटी॥कदमेउणउदुंअधिकरियगायिस्सं॥तावदचिरप्रवृत्तमु सूत्र०
पभोगक्षमंग्रीष्मसमयमधिकृत्यगीयतां॥संप्रतिहि॥सुभगसलिलावगाहाःपाटलसंसर्गसुरभिवनवाताः।
प्रच्छायसुलभनिद्रादिवसाःपरिणामरमणीयाः॥३॥नटी॥तहत्तिगायति॥ईसीसचुंबिआइंभमरेहिंस
उमारकेसरसिहाइं॥ओदंसयंतिदयमाणापमदाओसिरीसकुसुमाइं॥४॥सूत्र०॥आर्येसाधुगीतं॥
अहोरागबद्धचित्तवृत्तिरालिखितइवसर्वतोरंगः॥तदिदानींकतमत्प्रकरणमाश्रित्यैनमाराधयामः॥न

टी०॥ एणं अज्जमिस्सेहिं पढमं जेव्व आणत्तं आहिण्णाणसाउंदलं णाम अपुव्वं नाडअं पओएण अधिकरीअ
दु त्ति॥ सूत्र०॥ आर्ये सम्यगनुबोधितोस्मि॥ अस्मिन्क्षणे विस्मृतं खलु मया॥ कुतः॥ तवास्मि गीतरागेण
हारिणा प्रसभं हृतः॥ एष राजेव दुष्यंतः सारंगेणातिरंहसा॥ ५॥ इति निष्क्रांतौ॥ प्रस्तावना॥ ततः प्रविशति
मृगानुसारी सशरचापहस्तो राजा रथेन सूतश्च॥ सूतः॥ राजानं मृगं चावलोक्य॥ आयुष्मन्॥ कृष्णसारे
ददच्चक्षुस्त्वयि चाधिज्यकार्मुके॥ मृगानुसारिणं साक्षात्पश्यामीव पिनाकिनं॥ ६॥ राजा॥ सूत दूरममुना सा
रंगेण वयमाकृष्टाः॥ अयं पुनरिदानीमपि॥ ग्रीवाभंगाभिरामं मुहुरनुपतति स्यंदने बद्धदृष्टिः पश्चार्द्धेन प्रवि
ष्टः शरपतनभयाद्भूयसा पूर्वकायं दर्भैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वाद्वि

यति बहुतरं स्तोकमुर्व्यां प्रयाति॥ ७॥ तदेष कथमनुपदमेव प्रयत्नप्रेक्षणीयः संवृत्तः॥ सूत॥ आयुष्मन्॥
उद्घातिनी भूमिरिति मया रश्मिसंयमनाद्रथस्य मंदीकृतो वेगः॥ तेन मृग एषः प्रकृष्टांतरः संप्रति समदेशवर्तिनि
स्ते न दुरासदो भविष्यति॥ राजा॥ तेन हि मुच्यंतामभीषवः॥ सूतः॥ यथाज्ञापयत्यायुष्मान्॥ रथवेगं निरूप्य॥ आ
युष्मन्पश्यपश्य॥ मुक्तेषु रश्मिषु निरायतपूर्वकाया निष्कंपचामरशिखा निभृतोर्ध्वकर्णाः॥ आत्मोद्धतैरपि
रजोभिरलंघनीया धावंत्यमी मृगजवाक्षमयेव रथ्याः॥ ८॥ राजा॥ सत्यमतीत्य हरितो हरींश्च वर्त्तंते वाजिनः
तथाहि॥ यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां यदर्द्धे विच्छिन्नं भवति कृतसंधानमिव तत्॥ प्रकृत्या यद्व
क्रं भवति समरेखं नयनयोर्न मे पार्श्वे किंचित्क्षणमपि दूरे रथजवात्॥ ९॥ सूत पश्यैनं व्यापाद्यमानं इति शर

संधानंनाटयति॥नेपथ्ये॥भोभोराजन्आश्रममृगोयंनहंतव्यः॥सूतः॥आकर्ण्यावलोक्यच॥आयुष्मन्
स्यखलुतेबाणपातवर्त्तिनः कृष्णसारस्यांतरेतपस्विन उपस्थिताः॥राजासंभ्रमं॥तेनहिप्रगृह्यतांवाजिनः॥
तथेतिरथंस्थापयति॥ततःप्रविशत्यात्मनातृतीयोवैखानसः॥वैखानसः॥हस्तमुद्यम्य॥राजन्आश्रमम
गोयंनहंतव्योनहंतव्यः॥नखलुनखलुबाणः संनिपात्योयमस्मिन्मृदुनिमृगशरीरे पुष्पराशाविवाग्निः
क्ववतहरिणकानांजीवितंचातिलोलंक्वचविशिखनिपातावज्रसाराःशरास्ते॥१०॥तत्साधुकृतसंधानंप्र
तिसंहरसायकं॥आर्त्तत्राणायवःशस्त्रंनप्रहर्तुमनागसि॥११॥राजा॥एषप्रतिसंहृतः॥यथोक्तंकरोति।
वैखानसः॥सदृशमेतत्पुरुवंशप्रदीपस्यभवतः जन्मयस्यपुरोर्वंशेयुक्तरूपमिदंतव॥पुत्रमेवंगुणोपेतं

चक्रवर्त्तिनमाप्नुहि॥१२॥इतरौबाहुमुद्यम्यसर्वथाचक्रवर्त्तिनंपुत्रमाप्नुहि॥राजा॥सप्रणामंप्रतिगृहीतं
वैखानसः॥राजन्समिदाहरणायप्रस्थितावयं॥एषखलुकण्वस्यकुलपतेरनुमालितीरमाश्रमोदृश्यते॥
नचेदन्यःकार्यातिपातःप्रविश्यप्रतिगृह्यतामातिथ्येनसंस्कारः॥अपिच॥रम्यास्तपोधनानांप्रतिहतवि
घ्नाःक्रियाःसमालोक्यज्ञास्यसिकियद्भुजोमेरक्षतिमौर्वीकिणांक इति॥१३॥राजा॥अपिसन्निहितोत्रकु
लपतिः॥वैखानसः॥इदानीमेवदुहितरंशकुंतलामतिथिसंस्कारायनियुज्यदैवमस्याःप्रतिकूलंशमयि
तुंसोमतीर्थंगतः॥राजा॥भवतुतांद्रक्ष्यामिसाखलुविदितभक्तिंमांमहर्षेः करिष्यति॥वैखानसः॥साधयामस्ता
वत्॥इतिसशिष्योनिष्क्रांतः॥राजा॥सूतचोदयाश्वान्॥पुण्याश्रमदर्शनेनतावदात्मानंपुनीमहे॥सूतः॥

॥शा॰ना॥

॥४॥ यदाज्ञापयत्यायुष्मान् ॥ इति रथवेगं निरूपयति ॥ राजा ॥ समंतादवलोक्य ॥ सूत ॥ अकथितोपि ज्ञायत ए अं॰१
वायमाश्रमाभोगस्तपोवनस्येति ॥ सूतः ॥ कथमिव ॥ राजा ॥ किंनपश्यति भवानिहहि ॥ नीवाराः शुकगर्भको
टरमुखभ्रष्टास्तरूणामधः प्रस्निग्धाः क्वचिदिंगुदीफलभिदः सूच्यंत एवोपलाः ॥ विश्वासोपगमादभिन्नगत
यः शब्दं सहंते मृगास्तोयाधारपथाश्च वल्कलशिखानिष्यंदरेखांकिताः ॥१४॥ अपि च ॥ कुल्यांभोभिः प्र
सृतिचपलैः शाखिनो धौतमूला भिन्नो रागः किसलयरुचामाज्यधूमोद्गमेन ॥ एते चार्वागुपवनभुवि छिन्न
दर्भांकुरायां नष्टातंका हरिणशिशवो मंदमंदं चरंति ॥१५॥ सूतः ॥ सर्वमुपपन्नं ॥ राजा ॥ स्तोकमंतरं ग
त्वा सूत तपोवननिवासिनामुपरोधो मा भूत् ॥ एतावत्येव रथं स्थापय यावदवतरामि ॥ सूतः ॥ धृताः

॥४॥

प्रग्रहाः अवतरत्वायुष्मान् ॥ राजा ॥ अवतीर्य सूत विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम ॥ इदं ता
वद्गृह्यतामिति सूतायाभरणानि धनुश्चोपनीयार्पयति ॥ सूत यावदाश्रमवासिनः प्रविक्ष्याहमुपावर्ते तावदा व
नि र्द्रपृष्ठाः क्रियंतां वाजिनः ॥ सूतः ॥ तथेति निष्क्रांतः ॥ राजा परिक्रम्यावलोक्य च ॥ इदमाश्रमद्वारं यावत्प्रविशामि ॥
प्रविश्य निमित्तं सूचयन् ॥ शांतमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य ॥ अथवा भवितव्यानां द्वारा
णि भवंति सर्वत्र ॥१६॥ नेपथ्ये ॥ इदो इदो सहीओ ॥ राजा कर्णं दत्वा ॥ अये दक्षिणेन वृक्षवाटिकायामाला
प इव श्रूयते यावदत्र गच्छामि परिक्रम्यावलोक्य च ॥ अये एतास्तापसकन्यकाः स्वप्रमाणानुरूपैः से
चनघटैर्बालपादपेभ्यः पयो दातुमित एवाभिवर्त्तंते ॥ निरूप्य च ॥ अहो मधुरमासां दर्शनं ॥ शुद्धांतदुर्लभमि

॥बा०ना०। दं वपुराश्रमवासिनो जनस्यास्य॥ दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः॥१७॥ यावदिमां छायामा अं०१
॥५॥ श्रित्य प्रतिपालयामि॥ ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुंतला॥ इदो इदो सहिओ॥ अन
सूया॥ हला सउंदले तुवत्तो वि तादकण्णवस्स अस्समरुक्खा कापिअदरे ति तक्केमि॥ जेण णोमालिआ कुसु
मपेलवा तुमं वि एदाणं आलवालपूरणे णिउत्ता॥ शकुंतला॥ ण केवलं तादणिओओ एव॥ अत्थि मे सो
दरसिणेहो एदेसु॥ इति वृक्षसेचनं निरूपयति॥ राजा कथमियं सा कण्वदुहिता॥ असाधुदर्शी खलु
तत्रभवान्काश्यपः य इमामाश्रमधर्मे नियुंक्ते॥ इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति
ध्रुवं स नीलोत्पलपत्रधारया समिल्लताञ्छेत्तुमृषिर्व्यवस्यति॥१८॥ भवतु पादपांतरित एव विश्रब्धं तां दे ॥५॥
व

नां पश्यामि॥ तथा करोति॥ शकुंतला॥ सहि अणसूये॥ अतिपिणद्धेण वक्कलेण पिअंवदाये णिअंति
दह्मि। सिढिलेहि दाव णं॥ अन०॥ तह इति शिथिलयति॥ प्रियंवदा॥ एत्थ पओहरवित्थारइत्तुअं अत्त
णो जोवणं उवालह। मं किं उवालभेसि॥ राजा॥ इदमुपहितसूक्ष्मग्रंथिना स्कंधदेशे स्तनयुगपरिणाहाच्छा
दिना वल्कलेन॥ वपुरभिनवमस्याः पुष्यति स्वां न शोभां कुसुममिव पिनद्धं पांडुपत्रोदरेण॥१९॥ कामंतु म
रूपमस्या वयसो वल्कलं न पुनरलंकारश्रियं न पुष्यति॥ कुतः॥ सरसिजमनुविद्धं शैवलेनापि रम्यं म
लिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति॥ इयमधिकमनोज्ञा वल्कलेनापि रम्या किमिव हि मधुराणां मंड
नं नाकृतीनां॥२०॥ शकुं०॥ एसो वादेरिदपल्लवंगुलीहिं तुवेरदि विअ मं केसररुक्खओ जाव णं संभा

॥शा०ना०॥ वेसि ॥ परिश्रान्तमिति ॥ प्रियं० ॥ हला सउंदले एत्थ एव दाव मुहुत्तअं चिट्ठ जाव तुए उवगदाए लदासणाहो वि अं १
॥६॥ अ अयं केसररुक्खओ पडिभादि ॥ शकु० ॥ अदो क्खु पिअंवदासि तुमं ॥ राजा ॥ प्रियमपि तथ्यमाह शकुंतलां प्रि
यंवदा ॥ अस्याः खलु ॥ अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू ॥ कुसुममिव लोभनीयं यौवनमंग
षु संनद्धं ॥२१॥ अन० ॥ हला सउंदले इअं सअंवरवहू सहआरस्स तुए किदणामहेआ वणजोसिणित्ति णो
मालिआ णं विसुमरसि रमणीए खु काले इमस्स लदापादवमिहुणस्स वदिअरो संवुत्तो ॥ णवकुसुमजोव्वणा वण
ज्जोसिणी बद्धपल्लवदाए उवभोगक्खमो सहआरो इति पश्यंती तिष्ठति ॥ प्रियं० ॥ अणसूए जाणासि किं सउं
दला वणज्जोसिणीं अदिमेत्तं पेक्खदि त्ति ॥ अनसू० ॥ ण क्खु विभावेमि कहेहि ॥ प्रियं० ॥ जह वणज्जोसिणी अ ॥६॥

णुरूवेण पाअवेण संगदा अवि णाम एव्वं अहं वि अत्तणो अणुरूवं वरं लहेअं ति ॥ शकुं० ॥ एसो णूणं तुह अ
त्तगदमणोरहो ॥ कलशमावर्जयति ॥ राजा ॥ अपि नाम कुलपतेरियमसवर्णक्षेत्रसंभवा स्यात् ॥ अथवा कृतं
संदेहेन ॥ असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः ॥ सतां हि संदेहपदेषु वस्तुषु प्रमाणमंतः
करणप्रवृत्तयः ॥२२॥ तथापि तत्त्वत एवैनामुपलप्स्ये ॥ शकुं० ॥ ससंभ्रमं ॥ अम्मो सलिलसेअसंभमुग्गदो दूं
णोमालिअं उज्झीअ वअणं मे महुअरो अहिवट्टइ ॥ भ्रमरबाधां निरूपयति ॥ राजा ॥ सस्पृहं ॥ चलापांगां दृष्टिं स्पृश
सि बहुशो वेपथुमतीं रहस्याख्यायीव स्वनसि मृदु कर्णांतिकचरः ॥ करं व्याधुन्वंत्याः पिबसि रतिसर्वस्वमधरं वयं तत्त्वा
न्वेषान्मधुकर हतास्त्वं खलु कृती ॥२३॥ साध्वसाराधनमप्यस्या रमणीयं ॥ यतो यतः षट्चरणोऽभिवर्त्तते ततस्ततः

॥७॥शा० प्रेरितवामलोचना॥ विवर्तितभ्रूरीयमद्य शिक्षते दग्धादकामापि हि दृष्टिविभ्रमं॥२४॥शाकुं०॥ णणं सो दुट्ठो विर
मदि॥ अणदीगमिस्सं॥ पदांतरे स्थित्वा॥ सदृष्टिपेतं॥ कदं इदो वि अआ अछदि॥ हलापरित्ता अहमं इमिणा
दुव्विणीदेण दुट्ठमहुअरेण अहिहूयमाणं॥ उभसस्मितं॥ कावअं परित्ता दुं दुस्सदं अक्कंद॥ राअरक्खिदव्वा
णितवोवणाणि णाम॥ राजा॥ अवसरोयमात्मानंप्रकाशयितुं॥ न भेतव्यं न भेतव्यमित्यर्द्धोक्ते॥ स्वगतं॥ राजभा
वस्त्वभिज्ञातो भवेत्॥ भवत्वेवं तावदभिधास्ये॥ शाकुंतला पदांतरे स्थित्वा सदृष्टिक्षेपं॥ कदं इदो वि मं अणुसर
दि॥ राजा॥ सत्वरमुपसृत्य॥ कः पौरवे वसुमतीं सति शासतरि दुर्विनीतानां॥ अयमाचरत्यविनयं मुग्धासु
तपस्विकन्यासु॥२५॥ सर्वाः॥ राजानं दृष्ट्वा किंचिदिव संभ्रांताः॥ अन०॥ अज्जणं खु किंवि अच्चाहिदं॥ इअं ॥७॥

णो पियसही महुअरेण अहिहूअमाणा कदरीहूदा॥ शाकुंतलां दर्शयति॥ राजा॥ शाकुंतलाभिमुखो भू
त्वा॥ अयि तपो पवर्द्धते॥ शाकुंतला साध्वसादवचना तिष्ठति॥ अन०॥ दाणिं अदिहिविसेसलाहे
ण हला सउंदले गछ उडअं फलमिस्सं अग्घं उवहर॥ इदं पादोदयं भविस्सदि॥ राजा॥ भवतीनां सूनृतयैव गि
रा कृतमातिथ्यं प्रियं॥ तेण हि इमस्सिं पछाअसीअलाए सप्पवण्णवेदिआए मुहुत्तं उवविसिअ परिस्समं विणो
दं करेदु अज्जो॥ राजा॥ नूनं यूयमप्यनेनैव कर्मणा परिश्रांताः॥ अन०॥ हला सउंदले उइदं णो पज्जुपासणं
अदिहिणं ता एत्थ उवविसम्ह॥ सर्वे उपविशंति॥ शाकुं॥ आत्मगतं॥ किं णु खु इमं पपेक्खिअ तवोवणविरो
हिणो विआरस्स गमणीअम्हि संवुत्ता॥ राजा॥ सर्वा विलोक्य॥ अहो समवयोरूपरमणीयं भवतीनां सौहृद

श० ना० ॥९॥ यं ॥ प्रियं० ॥ जनान्तिकं ॥ अणसूए ॥ को णु खु एसो चउरगंभीराकिदी महुरं पिअं आलवंतो पहाववंदो अं १
विअ लक्खीअदी ॥ अन० ॥ सहि मम वि अत्थि कोदूहलं ॥ पुच्छिस्सं दाव णं ॥ प्रकाशं ॥ अज्जस्स महुरालावज
णिदो विस्सासो मं मंतावेदि ॥ कदमो अज्जेण राएसिणो वंसो अलंकरीअदि ॥ कदमो वा विरहपज्जुस्सुअजणो
किदो देसो ॥ किंणिमित्तं वा सउमारतरो वि तवोवणपडिस्समस्स अत्तापदं उवणीदो ॥ शकुं० ॥ हिअअ मा उ
त्तम ॥ एसा खु दे चिंतिदाणि अणसूआ मंतेदि ॥ राजा ॥ आत्मगतं ॥ कथमिदानीमात्मानं निवेदयामि कथं
वात्मापहारं करोमि ॥ भवत्वेवं तावदेनां वक्ष्ये ॥ प्रकाशं ॥ भवति यः पौरवेण राज्ञा धर्माधिकारे नियुक्तः ॥ सो
ऽहमविघ्नक्रियोपलंभाय धर्मारण्यमिदमायातः ॥ अन० ॥ सणाहा दाणिं धम्मचारिणो ॥ शकुं० ॥ शृंगारलज्जां ॥९॥

निरूपयति ॥ सख्यौ ॥ उभयोराकारं विदित्वा ॥ जनान्तिकं ॥ हला सउंदले जइ एत्थ अज्ज तादो संणिहिदो भ
वे ॥ शकुं० ॥ सरोषं ॥ तदो किं भवे ॥ सख्यौ ॥ इमं जीविदसव्वस्सेण वि अदिहिविसेसं किदत्थं करिस्सदि ॥ शकुं
तुम्हे दुए वि किं विहिअए करिअ मंतेह ॥ ण वो वअणं सुणिस्सं ॥ राजा ॥ वयमपि तावद्भवत्योः सखीगतं
पृच्छामः ॥ सख्यौ ॥ अज्ज अणुग्गहो विअ इयं अब्भत्थणा ॥ राजा ॥ भगवान्काश्यपः शाश्वते ब्रह्मणि
स्थित इति प्रकाशः ॥ इयं च वः सखी तदात्मजेति कथमेतत् ॥ अन० ॥ सुणादु अज्जो ॥ अत्थि कोसिओ त्ति
गोत्तणामहेयो महप्पहावो राएसि ॥ राजा ॥ अस्ति श्रूयते ॥ अन० ॥ तं णो पिअसहीए पहवं अवगच्छ ॥ तेण उ
ज्झिआए सरीरसंवड्ढणादिहिं तादकस्सवो से पिदा ॥ राजा ॥ उज्झितशब्देन जनितं मे कुतूहलं ॥ आमूलाच्छ्रोतुमिच्छा

॥शा०ना०॥ सि॥ अन०॥ सुणादु अज्जो गोदमीतीरे पुरा किल तस्स राएसिणो उग्गे तवसि वट्टमाणस्स किं वि जादसंकेहिं अं १
॥ए॥ देवेहिं मेणआ णाम अच्छरा पेसिदा णियमविग्घकारिणी॥ राजा॥ अस्त्येतदन्यसमाधिभीरुत्वं देवानां॥ अन०
तदो वसंतोदारसमए से उम्मादयित्तअं रूपं पेक्खिय इत्यर्द्धोक्ते लज्जया विरमति॥ राजा॥ परस्तादवगम्यत एव
सर्वथा अप्सरःसंभवैषा॥ अन०॥ अह इं॥ राजा॥ उपपद्यते॥ मानुषीषु कथं वा स्यादस्य रूपस्य संभवः॥ न प्रभात
रलं ज्योतिरुदेति वसुधातलात्॥ शकुं०॥ अधोमुखी तिष्ठति॥ राजा आत्मगतं॥ लब्धावकाशो मे मनोरथः॥
किं तु सख्याः परिहासोदाहृतां वरप्रार्थनां श्रुत्वा धृतद्वैधीभावकातरं मे मनः॥ प्रियं०॥ सस्मितं॥ शकुंतलां विलो
क्य नायकाभिमुखी भूत्वा॥ किं पुणो वि वत्तुकामो विअ अज्जो॥ शकुंतला सखीमंगुल्या तर्जयति॥ राजा०॥ ॥ए॥

तस्मगुपपत्तिं तं भवता॥ अस्ति नः सच्चरितश्रवणलोभादन्यदपि प्रष्टव्यं॥ अन०॥ अलं विचारिअ अ
णियंतणाणुओओ तवस्सिजणो णाम॥ राजा सखीं ते ज्ञातुमिच्छामि॥ वैखानसं किमनया व्रतमाप्रदा
नाद्व्यापाररोधि मदनस्य निषेवितव्यं॥ अथवा मदिरेक्षणवल्लभाभिराहो निवत्स्यति समं हरिणांगना
भिः॥ २७॥ प्रियं०॥ अज्ज धम्माचरणे पि परवसो अअं जणो गुरुणो उण से अणुरूववरप्पदाणे संक
प्पो॥ राजा॥ दुरापेयं न खलु प्रार्थना॥ आत्मगतं॥ भव हृदय साभिलाषं संप्रति संदेहनिर्णयो जातः॥
आशंकसे यदग्निं तदिदं स्पर्शक्षमं रत्नं॥ २८॥ शकुं०॥ सरोषमिव॥ अणसूये गमिस्सं अहं॥ अन०॥ किं
णिमित्तं॥ शकुंतला॥ इमं असंबद्धप्पलाविणीं पिअंवदं अज्जाए गोदमीए णिवेदइस्सं॥ अन०॥ सहि

शा०ना० णतेजुत्तं अकिदसक्कारं अदिहिविसेसं विसज्जीअ सच्छंददो गमणं॥ शकुं०॥ न किंचिदुक्त्वा प्रस्थितैव॥ राजा॥ अं १
॥१०॥ गृहीतुमिच्छन्निगृह्यात्मानं॥ आत्मगतं॥ अहो चेष्टाप्रतिरूपिका कामनोवृत्तिः॥ अहं हि॥ अनुयास्यन्मुनि
तनयां सहसा विनयेन वारितप्रसारः॥ स्थानादनुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः॥ २८॥ प्रियं०॥ शकुंतलां नि
रुध्य॥ हला सउंदले णतेजुत्तं गंतुं॥ शकुं०॥ सभ्रूभेदं॥ किंणिमित्तं॥ प्रियं०॥ रुक्खसेअणे दुवे धारेसि मे एहि दा
व अत्ताणं मोचिअ तदो गमिस्ससि॥ बलादेनां निवर्त्तयति॥ राजा०॥ भद्रे वृक्षसेचनादेव परिश्रांतामत्रभव
तीं लक्षये॥ तथा ह्यस्याः॥ स्रस्तांसावतिमात्रलोहिततलौ बाहू घटोत्क्षेपणादद्यापि स्तनवेपथुं जनयति श्वासः
प्रमाणाधिकः॥ बद्धं कर्णशिरीषरोधि वदने घर्मांभसां जालकं बंधे स्रंसिनि चैकहस्तयमिताः पर्याकुलामू ॥१०॥

शा०ना० श्रीरामो विजयते॥ अथ शकुंतलस्य द्वितीयोंकः प्रारभ्यते॥ ॥ततः प्रविशति विषण्णो विदूषकः॥ विदू अं २
॥१२॥ षकः॥ दीर्घं निश्वस्य॥ भो दिट्ठं एतस्स मिअआसीलस्स रण्णो वअस्सभावेण णिविण्णो म्हि॥ अअं मिओ अ
अं वराहो अअं सद्दूलो त्ति मज्झण्णे वि गिम्हे विरलपाअवच्छाआसु वणराई ~~अस्सासिसिअं~~सु आहि
डिअदि अडवीदो अडवीं॥ पत्तसंकरकसाअकदुआणि गिरिणईजलाणि पिअंति॥ अणिअदवेलं
सुल्लमंसभूयिट्ठो आहारो आह्निअदि॥ तुरगाणुधावणकंडिदसंधिणो रत्तिम्मि वि णिकामं सइदव्व
ं णत्थि॥ तदो महंते एव्व पच्चुसे दासीए पुत्तेहिं सउणिलुद्धएहिं वणग्गहणकोलाहलेण पडिबोधिदो म्हि
एत्तएण दाव पीडा ण णिक्कमदि॥ तदो गंडस्स उवरि पिंडिआ संवुत्ता हिओ किल अह्मेसु ओहीणे ॥१२॥

अज्जु अस्संभाविद अदिहिसक्कारं हृदये विपेक्खणस्स मित्तं लज्जेमि ॥ अज्ज विण्णविदुं ॥ राजा ॥ मा मैवं द
र्शनेनैव भवतीनां पुरस्कृतोस्मि ॥ द्वा कुं० ॥ अरण्ण हृये अदिरणवकुसुमग्गापरिकुवदी मे चलणेकुरव अ
साहासग्गं च वक्कलं ॥ दाव परिपालयेध मं जाव णं मोआवेमि ॥ राजा ॥ मामेवावलोकयंती सव्याजं विलंब्य
सहसखीभ्यां निष्क्रांता ॥ राजा ॥ मंदोत्सुक्योस्मि नगरमंनं प्रति यावदनुयांत्रिकान्समेत्य नातिदूरे तपोव
नस्य निवेशयेयं ॥ न खलु शक्नोमि शकुंतलाव्यापारादात्मानं निवर्तयितुं ॥ मम हि ॥ गच्छति पुरः शरीरं धा
वति पश्चादसंस्थितं चेतः ॥ चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य ॥ ३४ ॥ इति निष्क्रांताः सर्वे ॥
इति शाकुंतले प्रथमोंकः ॥ १ ॥ ॥ ॥ श्री ॥ श्री ॥ ॥ ॥

कनत्तदीदेभि अणुसारेण अस्सपदं पविद्धस्स तावस्स कण्ण आसउं दत्ता प्पा मम दृअ धम्मदाए
दंसिदा ॥ संपदं ण अरगमणस्स समयं कदं विण्णकरेदि ॥ अज्ज वितस्स तंएधब चिंतयतस्स अत्थि क्क
प्पभादं ॥ अत्थु काग दीजा व णं किं चारपरिक्कमं पेक्खामि ॥ इति परिक्रम्यावलोक्य च ॥ एसो बाण
२ सणहत्थाहिं वणपुप्पमालाधारिणीहिं परिवुदो इदो एव्व आअच्छदि पिअवअस्सो ॥ भोदु अंगभंग विअल
वि अचिट्ठिस्सं ॥ जइ एवं वि णाम विस्समं लहेअं ॥ इति दंडकाष्ठमवलंब्य स्थितः ॥ ततः प्रविशति यथा
निर्दिष्टपरिवारो राजा ॥ राजा ॥ निश्वस्य ॥ कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनायासि । अकृतार्थेपि
मनसिजे रतिमुभयप्रार्थना कुरुते ॥ १ ॥ सस्मितं । एवमात्माभिप्रायसंभावितेष्टजनचित्तवृत्तिः प्रार्थयि

शा०वा० ण्णाविदुंअन्ने॥तद्यथा॥स्निग्धंवीक्षितमन्यतोपिनयनेयत्प्रेषयंत्यातयायातं–यच्चनितंबयोर्गुरुतया अं२॥
॥१३॥ मदंविलासादिव॥मागाइत्यवरुद्धयायदपिसासासूयमुक्तासखीसर्वंतत्किलमत्परायणमहोकामीस्वतां
पश्यति॥२॥विदूषकः॥तथास्थितएव॥भोवअस्सणमेहत्थपाआपसरंदिनावाआमेत्तकेणजीअइस्सं
राजा॥कुतोयंगात्रोपघातः॥विदू०॥कुदोकिलसअंअच्छीआउलीकरिअअस्सुकारणंपुच्छसि
राजा॥नखल्ववगच्छामि॥विदू०॥भोवअस्सजंवेदसोकुब्जलीलंविडंबेदितंकिंअत्तणोपहावेणउणणा
वेअस्स॥राजा॥नदीवेगस्तत्रकारणं॥विदू०॥मदुविअत्तवं॥राजा॥कथमिव॥विदू०॥एवंराअकज्जाणि
उज्झिअएआरिसेअमाणुससंचारेआउलेपदेसेवणचरवुत्तिणातुएहोदव्वं॥जंसच्चंपच्चहंसावदासमु ॥१३॥

स्सारणेहिंसंखोहिअसधिवधारणंमदुगत्ताणंअणीसोह्मिसंवुत्तो॥तापसादइस्संविसज्जिदुंसअंएकाहं
विदाववित्ससमिदुं॥राजा॥स्वगतं॥अयंचैवमाह॥ममापिकाश्यपसुतामनुस्मृत्यमृगयाविक्लवंचेतः॥कुतः
ननमयितुमधिज्यमस्मिशक्तोधनुरिदमाहितसायकंमृगेषु॥सहवसतिमुपेत्ययैःप्रियायाःकृतइवमुग्ध
विलोकितोपदेशः॥३॥विदूष०॥राज्ञोमुखंविलोक्य॥अत्तभवंकिंविहिअएकरिअमंतेदि॥अरण्णेमए
रुदिअंआसी॥राजा॥सस्मितं॥किमन्यदनतिक्रमणीयंमेसुहृद्वाक्यंइतिस्थितोस्मि॥विदू०॥चिरंजीवगं
तुमिच्छति॥राजा॥वयस्यतिष्ठसावशेषमेवचः॥विदू०॥आणवेदुभवं॥राजा॥विश्रांतेनभवताममाप्येक
स्मिन्ननायासेकर्मणिसहायेनभवितव्यं॥विदू०॥किंमोदअखंडिआतेणहिसुग्गहिदोअअंववस्सणो॥

॥ना०त्रा०॥ राजा॥ यत्र नत्स्यानि॥ कः कोत्र भोः॥ प्रविश्य दौवारिकः॰ प्रणम्य॥ आणवेदु भट्टा॥ राजा॥ रैवतक सेना अं० २
॥१४॥ पतिस्तावदाहूयतां॥ दौवा०॥ तह त्ति निष्क्रम्य सेनापतिना सह प्रविश्य॥ एसो आणावअणउम्मुहो इदो दि
ण्णदिट्ठी एव भट्टा चिट्ठदि उवसप्पदु अज्जो॥ सेनापतिः॥ राजानमवलोक्य॥ दृष्टदोषापि स्वामिनि मृगया
केवलं गुण एव संवृत्ता॥ तथाहि देवः॥ अनवरतधनुर्ज्यास्फालनक्रूरपूर्वं रविकिरणसहिष्णु स्वेदलेशैरभि
न्नं॥ अपचितमपि गात्रं व्यायतत्वादलक्ष्यं गिरिचर इव नागः प्राणसारं बिभर्ति॥४॥ उपेत्य स्वामी जयतु ग
तश्वापदमरण्यं किमन्यदवस्थीयते॥ राजा॥ मंदोत्साहः कृतोस्मि मृगयापवादिना माढव्येन॥ सेनापतिः॥
जानांतिकं॥ सखे स्थिरप्रतिबंधो भव अहं तावत्स्वामिनश्चित्तवृत्तिमनुवर्तिष्ये॥ प्रकाशं॥ प्रलपत्वेष वैधेयः॥ ॥१४॥

प्रभुरेवं निनिर्दिष्टपतां॥ मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः सत्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रो
धयोः॥ उत्कर्षः स च धन्विनां यदिषवः सिध्यंति लक्ष्ये चले मिथ्यैव व्यसनं वदंति मृगयामीदृग्विनोदः कुतः॥
५॥ विदूषकः॥ अत्तभवं पकिदिं आपन्नो तुमं दाव अडवीदो अडवीं आहिंडंतो णरणासिआलोलुवस्स
जिण्णरिच्छस्स कस्स वि मुहे पडिस्ससि॥ राजा०॥ भद्र सेनापते आश्रमसन्निकृष्टे स्थिताः स्मः॥ अतस्ते वचो ना
भिनंदामि॥ अद्य तावत्॥ गाहंतां महिषा निपानसलिलं शृंगैर्मुहुस्ताडितं छायाबद्धकदंबकं मृगकुलं रोमंथ
मभ्यस्यतु॥ विश्रब्धं क्रियतां वराहततिभिर्मुस्ताक्षतिः पल्वले विश्रामं लभतामिदं च शिथिलज्याबद्धमस्म
द्धनुः॥६॥ सेना०॥ यत्प्रभविष्णवे रोचते॥ राजा॥ निवर्तय पूर्वगतान्वनग्राहिणः॥ तेन यथा न मे सैनिका

श्रा॰ ना॰ स्तपोवनमुपरुंधंतित्पानिषेद्धव्याः॥ पश्य॥ शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः स्पर्शानु अं २
॥१५॥ कूला इव सूर्यकांतास्तदन्यतेजोभिभवाद्वमंति॥७॥ सेना॥ यदाज्ञापयति स्वामी॥ विदू॰॥ ध्वंसदु ते उछाह
वुत्तंतो॥ निष्क्रांतः॥ सेनापतिः॥ राजा॥ परिजनं विलोक्य॥ अपनयंतु भवंतो मृगयावेषं॥ रैवतक त्वमपि स्वं
नियोगमशून्यं कुरु॥ परिजनः॥ जं देवो आणवेदि त्ति निष्क्रांतः॥ विदू॰॥ किदं भवदा णिम्मच्छिअं॥ संपदं ए
दस्सिं पाअवछाआए विरइदसदाविदाणदंसणीआए आसणे णिसीददु भवं॥ जाव अहं वि सुहासीणो हो
राजा॥ गच्छाग्रतः॥ विदू॰॥ एदु भवं॥ उभौ परिक्रम्योपविष्टौ॥ राजा॥ माढव्य अनवाप्तचक्षुःफलोसि येन त्व
या दर्शनीयं न दृष्टं॥ विदूष॰॥ णं भवं अग्गदो मे वट्टइ॥ राजा॥ सर्वः कांतमात्मानं पश्यति॥ तामाश्रम ॥१५॥

ललामभूतां शकुंतलामधिकृत्य ब्रवीमि॥ विदू॰॥ स्वगतं॥ होदु से अवसरं ण दाइस्सं॥ प्रकाशं॥ भो वअस्स
दे वैतावसकण्णआ अब्भत्थणीआ दिस्सइ॥ राजा॥ सखे॥ निराकृतनिमेषाभिर्नेत्रपंक्तिभिरुन्मुखैः॥ नवा
मिंदुकलां लोकः केन भावेन पश्यति॥८॥ न परिहार्ये वस्तुनि पौरवाणां मनः प्रवर्त्तते॥ सुरयुवतिसंभवं किल
मुनेरपत्यं तदुज्झिताधिगतं॥ अर्कस्योपरि शिथिलं च्युतमिव नवमालिकाकुसुमं॥९॥ विदू॰॥ विहस्य॥
जह कस्स वि पिंडखज्जूरेहिं उव्वेजिदस्स तिंतिणीए अहिलासो भवे तह इत्थियारअणपरि भोविणो भवदो
इअं अब्भत्थणा॥ राजा॥ न तावदेनां पश्यसि येनेदमवादीः॥ विदू॰॥ तं खु रमणिज्जं भवदो वि विम्हअं उ जं
प्पादेइ॥ राजा॥ वयस्य किं बहुना॥ चित्ते निवेश्य परिकल्पितसत्वयोगा रूपोच्चयेन विधिना मनसा कृता

॥शा०ना० तु॥ स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे धातुर्विभुत्वमनुचिंत्य वपुश्च तस्याः॥१०॥ विदू०॥ जई एवं पच्चादेसो अं२
॥१६॥ दाणिं रुववदीणं॥ राजा॥ इदं च मे मनसि वर्त्तते॥ अनाघ्रातं पुष्पं किसलयमलूनं कररुहैरनाविद्धं रत्नं मधु नव
मनास्वादितरसं॥ अखंडं पुण्यानां फलमिव च तद्रूपमनघं न जाने भोक्तारं कमिह समुपस्थास्यति विधिः॥११॥
तेण हि लहु परित्ताअदु णं भवं मा कस्स वि तवस्सिणो इंगुदीतेल्लमिस्सचिक्कणसीसस्स हत्थं पडिस्सदि॥ राजा॥ परवती
खलु तत्रभवती न च सन्निहितोऽत्र गुरुजनः॥ विदू॥ अत्तभवंतं अंतरेण किदिसो से दिट्ठिराओ॥ राजा॥ निसर्गा
देवाप्रगल्भस्तपस्विकन्याजनः॥ तथापि तु॥ अभिमुखे मयि संहृतमीक्षितं हसितमन्यनिमित्तकृतोदयं॥ विनय
वारितवृत्तिरतस्तया न विवृतो मदनो न च संवृतः॥१२॥ विदू०॥ ण खु दिट्ठमेत्तस्स तुह अंकं आरोहदि॥ ॥१६॥

राजा०॥ सखे मिथः प्रस्थाने पुनः शालीनतयापि माविष्कृतो भावस्तत्रभवत्या तथा हि॥ दर्भांकुरेण
चरणः क्षत इत्यकांडे तन्वी स्थिता कतिचिदेव पदानि गत्वा॥ आसीद्विवृत्तवदना च विमोचयंती शाखासु व
ल्कलमसक्तमपि द्रुमाणां॥१३॥ विदू०॥ तेण हि गहिदपाथेओ होहि॥ किदं तुए उववणं तवोवणं ति पेक्खा
मि॥ राजा॥ सखे तपस्विभिः कैश्चित्परिज्ञातोऽस्मि॥ चिंतय तावत्केनापदेशेन सकृदप्याश्रमे वसामः॥ वि
दू०॥ को अवरो अवदेसो तुम्हाणं राआणं णीवारछट्ठभाअं अम्हाणं उवहरंतु ति॥ राजा०॥ धिङ्मूर्ख
अन्यभागधेयमेतेषां रक्षणे निपतति यद्रत्नराशीनपि विहायाभिनंद्यं॥ पश्य॥ यदुत्तिष्ठति वर्णेभ्यो नृपा
णां क्षयि तत्फलं॥ तपःषड्भागमक्षय्यं ददात्यारण्यका हि नः॥१४॥ नेपथ्ये॥ हंत सिद्धार्थौ स्वः॥ राजा॥ क

॥१शु॥ र्गं दत्त्वा॥ अयि धीरप्रशांतस्वरतपस्विभिर्भवितव्यं॥ प्रविश्य दौवारिकः॥ जेदु जेदु भट्टा॥ एदे दुवे इसिकुमार अं२
ना०श्रा आ पडिहारभूमिं उवत्थिदा॥ तेन हि॥ अविलंबितं प्रवेशयैतौ॥ एसो पवेसेमि इति निष्क्रम्य ऋषिकुमाराभ्यां सह प्रवि।
६ श्य॥ इदो इदो भवंता॥ ऋषिकुमारौ राजानं विलोक्य॥ प्रथमः॥ अहो दीप्तिमतो पि विश्वसनीवसतिर
मुनीनां यतायस्य वपुषः॥ अथवा उपपन्नमेतदृषिभ्यो नातिभिन्ने राजनि॥ कुतः॥ अध्याक्रांता वसतिरमुनाप्याश्र
मे सर्वभोग्ये रक्षायोगादयमपि यतः प्रत्यहं संचिनोति॥ अस्यापि द्यां स्पृशति वशिनश्चारणद्वंद्वगीतः पुण्यः
शब्दो मुनिरिति मुहुः केवलं राजपूर्वः॥ द्वितीयः॥ गौतम अयं स बलभित्सखो दुष्यंतः॥ प्रथमः॥ अथ किं॥ द्विती
यः॥ तेन हि॥ नैतच्चित्रं यदयमुदधिश्यामसीमां धरित्रीमेकः कृत्स्नां नगरपरिघप्रांशुबाहुर्भुनक्ति॥ आशंसंते ॥१७॥

सुरयुवतयो बद्धवैरा हि दैत्यैरस्याधिज्ये धनुषि विजयं पौरुहूते च वज्रे॥१५॥ उपगम्य॥ विजयस्व राजन्॥ राजा॥
आसनादुत्थाय॥ अभिवादये भवंतौ॥ उभौ॥ स्वस्ति भवते॥ फलान्युपहरतः॥ सप्रणामं परिगृह्य॥ आज्ञामिच्छा
मि॥ उभौ॥ निवेदितो भवानाश्रमसदर्षिभिरसांनिध्याद्रक्षांसि इष्टिविघ्नमुत्सादयंति॥ तत्कतिपयरात्रं सारथिद्वितीये
न भवता सनाथीक्रियतामाश्रम इति॥ राजा॥ किमाज्ञापयंति॥ उभौ॥ तत्रभवतः कण्वस्य महर्षेरसांनिध्याद्रक्षांसि
इष्टिविघ्नमुत्सादयंति॥ तत्कतिपयरात्रं सारथिद्वितीयेन भवता सनाथीक्रियतमाश्रम इति॥ राजा॥ अनुगृहीतोस्मि
विदूषकं॥ अपवार्य॥ एसा दाणीं ते अणुऊला अब्भत्थणा॥ राजा॥ स्मितं कृत्वा॥ रैवतक मद्वचनादुच्यतां सार
थिः सबाणासनं रथं स्थापयेति॥ दौवारिकः॥ जं देवो आणवेदि त्ति निष्क्रांतः॥ उभौ॥ सहर्षं॥ अनुकारिणि पूर्वे
षां युक्तरूपमिदं त्वयि॥ आपन्नाभयसत्रेषु दीक्षिताः खलु पौरवाः॥१७॥ राजा॥ सप्रमाणं गच्छतां पुरो भवंतो अ
मिदृस्यः तेन हि भवंतं प्रार्थयेते ३

॥१८॥ हमप्पनुपदमागतराव॥उभौ॥विजयस्वेति निष्क्रां●तौ॥राजा॥मढव्य अप्पत्थिशाकुंतलादर्शनेकुतहलं॥वि॰
शा॰ना पढमंसपरिवाहमस्थिदाणिरकुवसवुत्तंतेणविंदु विनावसेसिदी॥राजा॰॥मानिमेषीर्नेनुमत्समीपेवतिष्ठते॥वि
दू॰॥एसोरकुवसादोरखिवदोदस्ति॥प्रविदौरिकः॥सङ्गोरह्रोनद्दिणोविजअपत्थाणंपेकुवदि॥एसउणणाअ
णदोदेवीणंअवाणंअस्लतिहरऔकरनओआगदो॥राजा॥सारदं॥किमंबाभिःप्रेषितः॥दौवा॰॥अहकिं
राजाँननुप्रवेश्यतां॥दौवारिकः॥तहरतिनिष्क्रम्यकरनकेणसहपुनःप्रविश्य॥एसोनट्टाउवसप्पराां॥करन॰
जेदुजेदुभट्टादेवीआणवेदि॥राजा॥किं॥करभ॰॥आआमिचउत्थदिअहेपउत्तपारणोमेउववासोभविस्सदित
हिंदीहउणाअवस्संसंभावइदवेति॥राजा॥इतस्तपस्विकार्यमितोगुरुजनाज्ञाद्वयमप्यनतिक्रमणीयंकिमत्र
विधेयं॥विदू॰॥तिसंकुविअअंतराले चिट्ठ॥राजा॥सत्यमाकुलीभूतोस्मि॥कृत्ययोर्भिन्नदेशत्वाद्वैधीभवति ॥१८॥

मेमनः॥पुरःप्रतिहतंशैलस्रोतःस्रोतोवहोयथा॥१८॥विचिंत्यसखेत्वमंबयापुत्रइतिप्रतिगृहीतः॥अतोभवानितःप्र
तिनिवृत्यमांतपस्विकार्यव्यग्रमानसमावेद्यतत्रभवतीनांपुत्रत्वमनुष्ठातुमर्हसि॥विदू॰॥माखुमंरकुवोभीरुअंअंग
णेसि॥राजा॥कथमेतद्भवतिसंभाव्यते॥विदू॰॥जहराआणुस्सएणगंतव्वंतहगछामि॥राजा॥ननुतपोवनोपरोधःप
रिहरणीयइतिसर्वाननुयात्रिकान्त्वयैवसहप्रस्थापयामि॥विदू॰॥सहर्षं॥तेणहिजुवराओह्मिसंवुत्तोहगिणं॥राजा॥
स्वगतं॥चपलोयंवटुःकदाचिदस्मत्प्रार्थनामंतःपुरेभ्यःकथयेत्‌भवत्वेनमेवंवक्ष्ये॥विदूषकंहस्तेगृहीत्वा॥प्रकाशं॥
वयस्यऋषिगौरवादाश्रमंगच्छामिनखलुतापसकन्यायांशाकुंतलायामभिलाषः॥पश्य॥क्वयंक्वपरोक्षमन्मथोमृगशावैः
सममेधितोजनः॥परिहासविजल्पितंसखेपरमार्थेननगृह्यतांवचः॥१९॥विदू॰॥अहइं॥इतिनिष्क्रांतासर्वे॥इतिश्री

ना० शा० कुंतले द्वितीयोंऽकः॥ ॥ ॥ ॥ अथ शाकुंतले तृतीयोंकः प्रारभ्यते॥ ततः प्रविशति कुशानादाय यजमानशिष्यः अं ३

॥१९॥ अहो महानुभावः पार्थिवो दुष्यंतः॥ यत्र प्रविष्टएवाश्रमं तत्र भवति राजनि निरुपद्रवाणि कर्माणि नः प्रवृत्तानि भवंति॥ का

बा कथा बाणसंधाने ज्याशब्देनैव दूरतः॥ हुंकारेणेव धनुषः स हि विघ्नानपोहति॥१॥ यावदिमान्वेदिसंस्तरणार्थं दर्भानृत्वि

ग्भ्य उपनयामि॥ परिक्रम्यावलोक्य च॥ आकाशे॥ प्रियंवदे कस्येदमुशीरानुलेपनं मृणालवंति च नलिनपत्राणि नीयंते॥

किं ब्रवीषि॥ आतपलंघनाद्बलवदस्वस्था शकुंतला तस्याः शरीरनिर्वापणायेति॥ तर्हि त्वरिततरं गम्यतां सखी सा ख

लु भगवतः कुलपतेरुच्छ्वसितं॥ अहमपि तावद्वैतानिकं शांत्युदकमस्यै गौतमीहस्ते विसर्जयिष्यामि इति निष्क्रांतः॥

शुद्धविष्कंभकः॥ ततः प्रविशति कामयमानावस्थो राजा॥ जानेहं तपसो वीर्यं सा बाला परवतीति मे विदितं॥ अलम ॥१९॥

स्मिन्नो हृदयं तथापि नेदं निवर्तयितुं॥२॥ मदनबाधां निरूप्य॥ भगवन्मन्मथ कुसुमायुधस्य शरतैक्ष्ण्यमेतत्॥ स्मृत्वा

आः ज्ञातं॥ अद्यापि नूनं हरकोपवह्निस्त्वयि ज्वलत्यौर्व इवांबुराशौ। त्वमन्यथा मन्मथ मद्विधानां भस्मावशेषः कथमे

वमुग्रः॥३॥ अपि च॥ भगवन्कुसुमायुध त्वया चंद्रमसा च विश्वसनीयाभ्यामभिसंधीयते कामिनीजनसार्थः॥ कुतः

तव कुसुमशरत्वं शीतरश्मित्वमिंदोर्द्वयमिदमयथार्थं दृश्यते मद्विधेषु॥ विसृजति हिमगर्भैरग्निमिंदुर्मयूखैस्त्वमपि

कुसुमबाणान्वज्रसारीकरोषि।४॥ अथवा॥ निश्वस्य॥ अनिशमपि मकरकेतुर्मनसो रुजमावहन्नभिमतो मे॥ यदि

रायतनयनां तामधिकृत्य प्रहरतीति॥५॥ भगवन्नेवमुपालब्धस्य तेन मां प्रत्यनुक्रोशः॥ वृथैव संकल्पशतैरजि

स्रमनंग नीतोसि मयातिवृद्धिं॥ आकृष्टचापः श्रवणोपकंठे मय्येव योग्यस्तव बाणमोक्षः॥६॥ परिक्रम्य॥ कनु

ना० त्रा० खलु संस्थिते कर्मणि प्रियादर्शनादृते शरणमन्यन्न यावदेनामन्विष्यामि ॥ सूर्यमवलोक्य ॥ इमामुग्रातपवेलां प्रायेण अं ३
॥२७॥ लतावलयवत्सु मालिनीतीरेषु ससखीजना शकुंतला गमयति ॥ भवतु ॥ तत्रैव तावद्गच्छामि ॥ परिक्रम्यावलोक्य
च ॥ अनया बालपादपवीथ्या सुतनुरचिरगतेति तर्कयामि ॥ संमीलयंति न तावद्बंधनकोशास्तयावचितपुष्पाः ॥
क्षीरस्निग्धाश्चामी दृश्यंते किसलयच्छेदाः ॥ ७ ॥ स्पर्शं रूपयित्वा ॥ अहो प्रवातसुभगोयमुद्देशः ॥ शक्यमरविंदसुर
भिः कणवाही मालिनीतरंगाणां ॥ अंगैरनंगतप्तैरविरलमालिंगितुं पवनः ॥ ८ ॥ परिक्रम्यावलोक्य च ॥ अस्मिन्वे
तसपरिक्षिप्ते लतामंडपे सन्निहितया शकुंतलया भवितव्यं ॥ तथाहि ॥ अभ्युन्नता पुरस्तादवगाढा जघनगौरवा
त्पश्चात् ॥ द्वारेस्य पांडुसिकते पदपंक्तिर्दृश्यतेभिनवा ॥ ९ ॥ यावद्विटपांतरेणावलोकयामि ॥ परिक्रम्य तथा कृत्वा ॥ अ ॥२७॥

ये लब्धं नेत्रनिर्वाणमेषा मे मनोरथप्रियतमा कुसुमास्तरणं शिलापट्टमधिशयाना सखीभ्यामन्वास्यते भवतु श्रोष्याम्या
सां विश्रब्धकथितानि ॥ विलोकयन् स्थितः ॥ ततः प्रविशति यथोक्तव्यापारा सह सखीभ्यां शकुंतला ॥ सख्यावुपवीजयतः ॥ ह
ला सउंदले अवि सुहदि दे णलिणीपत्तवादो ॥ शकुं० ॥ किं वीअंति मं सहीओ ॥ सख्यौ ॥ विषादं नाटयित्वा परस्परम
वलोकयतः ॥ राजा ॥ बलवदस्वस्थशरीरा शकुंतला दृश्यते तत्किमयमातपदोषः स्यादुत मे मनसि वर्तते ॥ विचिंत्य ॥ अ
थवा कृतं संदेहेन ॥ स्तनन्यस्तोशीरं शिथिलितमृणालैकवलयं प्रियायाः संबाधं किमपि कमनीयं वपुरिदं ॥ समस्तापः
कामं मनसिजनिदाघप्रसरयोर्न तु ग्रीष्मस्यैवं सुभगमपराद्धं युवतिषु ॥ १० ॥ प्रियंवदा ॥ जनांतिकं ॥ सहि अणसूये तस्स
राएसिणो पढमं दंसणादो दं आदुरअपज्जुस्सुआ विअ सउंदला ॥ किं णु खु से तंणिमित्तो अ अं आदंको भवे ॥ अन० ॥

॥ना०॥ सहि मम विइदसी आसंकादिअ अस्स होदु पुच्छिस्सं दाव णं ॥ प्रकाशं ॥ सहि पुच्छिदव्वासि किं पि बलिअं खु दे उव्वेदो ॥ राजा ॥ अं ३
॥२१॥ वक्तव्यमेव ॥ शशिकरविशदान्यस्यास्तथापि दुःसहनिदाघशंसीनि निर्भिन्नानि स्पर्शमियामृणालवलयानि तन्वंग्याः ॥ ११ ॥ शाकुं
तला ॥ पूर्वार्द्धं न पुनस्त्वयाप्यामुदस्य ॥ हला किं वत्तुकामासि ॥ अन ॥ हला सउंदले अणब्भंतरा अ अणगदस्स वुत्तंतस्स किं दुजा
दिसी इदिहासणिबंधेसु कामअमाणणं अवत्थासुणीअ दिता दि सिं ते पेक्खामि कहेहि किं णिमित्तं दे संदावो ॥ विआरं खु प
रमत्थदो जाणिअ आरंभो पडियारस्स ॥ राजा ॥ अनसूयामप्यनुगतो मदीयस्तर्कः ॥ न हि स्वाभिप्रायेण मे दर्शनं ॥ शा
कुं ॥ आत्मगतं ॥ बलिअं खु मे अहिणिवेसो दाणिं पि सहसा णदाणं ण सक्कणोमि णिवेदितुं ॥ प्रियं ॥ सहि सउंदले सुट्ठु एसा भण
दि किं अत्तणो आतंकं उपेक्खसि ॥ अणुदिअहं खु परिहीअसि अंगेहिं केवलं लावण्णमई छाआ तुमं ण मुंचदि ॥ राजा ॥२१॥

अवितथमाह प्रियंवदा ॥ तथा हि ॥ क्षामक्षामकपोलमाननमुरः काठिन्यमुक्तस्तनं मध्यः क्लान्ततरः प्रकामविनतावंसौ
छविः पाण्डुरा ॥ शोच्या च प्रियदर्शना च मदनक्लिष्टेयमालक्ष्यते पत्राणामिव शोषणेन मरुता स्पृष्टा लता माधवी ॥ १२
शाकुं० ॥ सहि कस्स वा अण्णस्स कहइस्सं आआसइत्ति आआसइत्ति आदाणिं वो भविस्सं ॥ उभे ॥ अदो एव्व खु णिब्बंधो
सिणिद्धजणसंविभत्तं हि दुक्खं सज्झवेअणं होदि ॥ राजा ॥ पृष्टा जनेन समदुःखसुखेन बालानेयं न वक्ष्यति मनोगतमाधि
हेतुं ॥ दृष्टो विवृत्य बहुशोऽप्यनया सतृष्णमत्रान्तरे श्रवणकातरतां गतोऽस्मि ॥ १३ ॥ शाकुं ॥ सहि जदो पहुदि मम दंस
णपहं आअदो सो तवोवणरक्खिदा राएसि तदो आरहिअ तग्गदेण अहिलासेण एतदवत्थास्मि संवुत्ता ॥ राजा ॥ स
हर्षं श्रुतं श्रोतव्यं ॥ स्मर एव तापहेतुर्निर्वापयिता स एव मे जातः ॥ दिवस इवाभ्रश्यामस्तपात्यये जीवलोकस्य ॥ १४ ॥

ना०शा० शाकुं०॥ तं जदि वो अणुमदं तह जधणस्स राएसिणो अणुकंपणिज्जा। होमि अणाहासिं च हमे निलोदअं॥ राजा॥ संश अं ३
॥२२॥ यच्छेदि वचनं॥ प्रियं०॥ जनांतिकं॥ अणसूए दूरगअमम्महा अक्खमा इअं कालहरणस्स॥ जस्सिं बद्धभावा एसा सो लला व
मभूदो पोरवाणं ता जुत्तं से अहिलासो अहिणंदिदुं॥ अन०॥ तह जह भणसि॥ प्रियं०॥ प्रकाशं॥ सहि दिट्ठिआ अणुरू
वो दे अहिणिवेसो साअरं वज्जिअ कहिं वा महाणईओ दरइ को दाणिं सहआरं अंतरेण अतिमुत्तलदं पल्लविदं सहेदि
दि॥ राजा॥ किमत्र चित्रं॥ यदि विशाखे शशिलेखामनुवर्त्तेते॥ अन०॥ को उण उवाओ भवे जेण अविलंबिअं णिहुअं स
हीए मणोरहं संपादेस्स॥ प्रियं०॥ णिहुअं त्ति चिंतणिज्जं भवे सिग्घं त्ति सुअरं॥ अन०॥ कहं विअ॥ प्रियं०॥ णं सो राएसी इम
स्सिं सिणिद्धदिट्ठिसूइदाहिलासो इमाइं दिअहाइं पजाअरकिसो लक्खिअदि॥ राजा॥ सत्यमित्थंभूत एवास्मि॥ इदमशिशि ॥२२॥

रैरंतस्तापाद्विवर्णमणीकृतं निशि निशि भुजन्यस्तापांगप्रसारिभिरश्रुभिः॥ अनभिलुलितज्याघाताकं मुहुर्मणिबंधना
त्कनकवलयं स्रस्तं स्रस्तं मया प्रतिसार्यते॥१५॥ प्रियं॥ विचिंत्य॥ हला मअणलेहो से करीअदु इमं देवसेसावदेसेण सुमणो
गोविदं करीअ से हत्थं पाइस्सं॥ अन०॥ रोअइ मे सउमारो पओओ किंवा सउंदला भणादि॥ शाकुं॥ को णिओओ विकप्पीअ
दि॥ प्रियं॥ तेण हि अत्तणो उवण्णासप्पुव्वं चिंतेहि दाव किंचि ललिअपदबंधणं॥ शाकु०॥ चिंतेमि अहं अवहीरणाभीरुअं पु
णो वेवइ मे हिअअं॥ राजा॥ अयं स ते तिष्ठति संगमोत्सुको विशंकसे भीरु यतोऽवधीरणं॥ लभेत वा प्रार्थयिता न वा श्रियं
श्रिया दुरापः कथमीप्सितो भवेत्॥१६॥ सख्यौ॥ अत्तगुणावमाणिणि को दाणिं सरीरणिव्वावइत्तिअं सारदिअं जो
सिणिं पडंतेण वारेदि॥ शाकुं०॥ सस्मितं॥ णिओइदा दाणिं म्हि॥ उपविश्य चिंतयति॥ राजा॥ स्थाने खलु विस्मृतनिमेषे

॥ना॰शा॰ णचक्षुषाप्रियामवलोकयामि॥उन्नमितैकभ्रूलतमाननमस्याःपदानिरचयंत्याः॥कंटकितेनप्रथयतिमय्यनुरागंक
॥२३॥ पोलेन॥१७॥शकुं॰॥हलाचिंतिअंमएगीतवत्थुणहुसंणिहिदाणिउणलेहणसाहणाणि॥प्रियं॰॥इमस्सिंसुओदरसुउ
मारेणलिणीपत्तेणहेहिंणिक्खित्तवण्णंकरेहि॥शकुं॰॥यथोक्तरूपयित्वा॥हलासुणुहदाणिंसंगदत्थंणवेत्ति॥उभे॥
अवहिदह्म॥शकुं॰॥वाचयति॥तुज्झणआणेहिअअंममउणमअणोदिवाविरत्तिंमि॥निग्घणतवेइदंबलिअंतुहहु
त्तमणोरहाइंअंगाइं॥१८॥राजा॥सहसोपसृत्य॥तपतितनुगात्रिमदनस्त्वामनिशंमांपुनर्दहत्येव॥ग्लपयतियथा
शशांकंनतथाहिकुमुद्वतींदिवसः॥१९॥सख्यौ॥सहर्षं॥साअदंअविलंबिणोरहस्स॥शकुं॰॥अभ्युत्थातुमिच्छति
॥राजा॥अलमलमायासेन॥संदष्टकुसुमशयनान्याशुक्लांतबिसभंगसुरभीणि॥गुरुपरितापानिनतेगात्राण्युपचा ॥२३॥

रमर्हति॥२०॥अन॰॥इदोसिलाअलेकदेसंअलंकरीअदुवअस्सो॥राजा॥उपविशति॥शकुंतलासलज्जंतिष्ठति॥प्रिय
दुवेणंपिवोअण्णोण्णाणुराओपच्चक्खोसहीसिणेहोमंपुनरुत्तवादिणिंकरिअदि॥राजा॥भद्रेनैतत्परिहार्यंविवक्षि
तमप्यनुक्तमनुतापंजनयति॥प्रियं॥आवण्णस्सविसअवासिणोअत्तिहरेणरण्णाहोदव्वंतिएसोवोधम्मो॥राजा॥
नास्मात्परं॥प्रियं॥तेणहिइअंणोपिअसहीतुमंउद्दिसिअइमंअवत्थंतरंभअवदामयणेणआरोविदा।ताअरु
हसिअब्भुववत्तीएजीविदंसेअविलंबिदुं॥राजा॥भद्रेसाधारणोयंप्रणयः॥सर्वथानुगृहीतोस्मि॥शकुं॥प्रियंवद
दामवलोक्य॥हलाकिंअंतेउरविरहपज्जुः॥सुअस्सराएसिणोउवरोहेण॥राजा॥इदमनन्यपरायणमन्यथाहृद
यसंनिहितेहृदयंमम॥यदिसमर्थयसेमदिरेक्षणेमदनबाणहतोस्मिहतःपुनः॥२१॥अन॰॥वअस्सबहुवल्लहाराआ
णोपिअसहीबंधुजणसोअणिज्जाणहोइतहणिव्वहेहि॥राजा॥भद्रेकिंबहुना॥परिग्रहबहुत्वेपिद्वेप्रतिष्ठेकुलस्य

॥ना०त्रु०॥ मेसमुद्दवसनाचोर्वीसखीचयुवयोरियं॥२२॥उभे॥सिणिद्ध देस्त॥प्रियं॥सदृसेणसदिसहिसंजोएसमणं॥प्रस्थिते॥शं अं ३॥
॥२४॥ कुं॥दलाञ्सरणारदित्तिञ्णदरावीञ्आअस्सदु॥उभे॥यदुवीरैजोसरणंसोतुद्दसमीपेवटूइ॥निष्क्रांते॥शाकुं॥क
द्गदेसघ॥राजा॥अलमलमावेगेन॥नन्वयमाराधयितजनस्त्वसमीपेवर्त्तते॥किंशीतलैःक्लमविनोदिभिरार्द्रवाता
न्संचारयामिनलिनीदलतालवृंतैः॥अंकेनिधायकरभोरुयथासुखंतेसंवाहयामिचरणावुतपद्मताम्रौ॥२३॥शा
कुं॥णमाणणीएसुअत्ताणंअवराहइस्सं॥उत्थायगंतुमिच्छति॥राजा॥स्कंदरिअनिर्वाणोदिवसइयंचसमवस्था
उत्सृज्यकुसुमशयनंनलिनीदलकल्पितस्तनावरणं॥कथमातपेगमिष्यसिपरिबाधापेलवैरंगैः॥२४॥बलादेनांनिवे
र्तयति॥शाकुं॥पोरवरक्खअविणअं॥मअणसंततस्सविणदुअत्तणोपहवामि॥राजा॥भीरुअलंगुरुजनभयेन
दिस्मातेविदितधर्मातत्रभवान्नतत्रदोषंग्रहीष्यतिकुलपतिः॥अपिच॥गांधर्वेणविवाहेनबह्व्योराजर्षिकन्य ॥२४॥

काः॥श्रूयंतेपरिणीतास्ताःपितृभिश्चाभिनंदिताः॥२५॥शाकुं॥मुंचदाववमं विसुमरीअएणंअणुमाणइस्सं
राजा॥अरिक्ततकोमलस्यतावत्कुसुमस्येववनस्यषट्पदेन॥अधरस्यपिपासतामयातेसदयंसुंदरिगृ
ह्यतेरसोस्य॥२६॥मुखमस्याःसमुन्नमइतुमिच्छति॥शाकुंतलापरिहरतिनाट्येन॥नेपथ्ये॥चक्कवाकवहूए
आमंतेहिसहअरं॥शाकुं०॥ससंभ्रमं॥पोरवअसंसअंममसरीरवुत्तंतोवलंभाअअज्जागोदमीइदोएव्व
आअच्छदिदाविडवंतरिदोसहि॥राजा॥तथास्मानमाश्वस्यतिष्ठति॥ततःप्रविशतिपात्रहस्तागोतमीसखीच॥द्वरे
अज्जगोदमी॥गोतमीशाकुंतलोउपेत्य॥जादेअविणदुसंवादावाइंदेअंगाइं॥शाकुं॥अत्थिमेविसेसो॥गोतमी
इमिणादब्भोदएणणिराबाधंएघदेसरीरंभविस्सदि॥शिरसिशाकुंतलामभ्युक्ष्य॥गोतमी॥वच्छेपरिणदोदि

ना०॥शा० अहो राहिउ उजं एव्व गछ्छस्स ॥ प्रस्थिता शकुंतला ॥ आत्मगतं ॥ हिअअ पढमं एव्व सुहोवणदे मणोरहे का अरत्ता अं३
॥२५॥ वं न मुंचसि साणुसअं विहट्टिअस्स कहं दे संपदं संदावो ॥ पदांतरे गत्वा ॥ प्रकाशं ॥ लदावलअ संदावहारअ आमंत
एतु मं तुओ विपरिभोगाय ॥ दुःखेन निष्क्रांता शकुंतला सहेताराभिः ॥ राजा पूर्वस्थानमुपेत्य सनिश्वासं ॥ अहो वि
घ्नवत्यः प्रार्थितार्थसिद्धयः ॥ यमादि ॥ मुहुरंगुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामं ॥ मुखमंसविवर्ति
पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुंबितं तत् ॥ २७ ॥ क्व नु खलु संप्रति गच्छामि ॥ अथवा ॥ इहैव प्रियाभुक्तमुक्ते लताव
लये मुहूर्तं स्थास्यामि ॥ सर्वतोवलोक्य ॥ तस्याः पुष्पमयी शरीरलुलितशय्या शिलायामियं क्रांतो मन्मथलेखएष
नलिनीपत्रे नखैरर्पितः ॥ हस्ताद्भ्रष्टमिदं बिसाभरणमित्यास मानेक्षणो निर्गंतुं सहसा न वेतसगृहाच्छक्नोमि शू ॥२५॥

न्यादपि ॥२८॥ आकाशे ॥ राजन् ॥ सायंतने सवनकर्मणि संप्रवृत्ते वेदीं हुताशनवतीं परितः प्रयस्ताः ॥ छाया
श्चरंति बहुधा भयमादधानाः संध्यापयोदकपिशाः पिशिताशनानां ॥ २९ ॥ राजा ॥ अयमागच्छामि ॥ इति निष्क्रां
ताः सर्वे ॥ इति शकुंतलोत्तनीयोंकः ॥ ॥ ॥ ०॥ अथ शकुंतले चतुर्थोंको लिखितुमारभ्यते ॥
ततः प्रविशतः कुसुमावचयमभिनयंत्यौ सख्यौ ॥ अन० ॥ हला पिअंवदे जइवि गंधव्वेण विवाहविहिणा णिव्वुत्त
कल्लाणा सउंदला अणुरूवभत्तुगामिणी संवुत्तेति णिव्वुदं मे हिअअं तहवि एत्तिअं चिंतणिज्जं ॥ प्रियं० ॥ कहं विअ
अन० ॥ अज्ज सो राएसि इट्ठिं परिसमाविअ इसीहिं विसज्जिओ अत्तणो णअरं पविसिअ अंतेउरसमागदो इदोगा
दं वुत्तंतं सुमरदि वा ण वेत्ति ॥ प्रियं० ॥ विसद्धा होहि ण तादिसा आकिदिविसेसा गुणविरोहिणो होंति ॥ तादो दाणिं
इदं वुत्तंतं सुणिअ ण आणे किं पडिवज्जिस्सदित्ति ॥ अन० ॥ जह अह निवेदेमि तह तस्स अणुमदं भवे ॥ प्रियं ॥ कहं विअ

ना०शा०॥ अन०॥ पुणावदेकण्णआपडिवादणिज्जेत्ति अअंदाव पढमोसंकप्पोतंजेघरएविंसंपादिअ अप्पआसेणकिदस्यो अं ४
॥२६॥ गुरुअणो॥ प्रियं०॥ पुष्पभाजनं विलोक्य सहि अवइदाइं बलिकम्मपज्जत्ताइं कुसुमाइं॥ अन०॥ णं पिअसहीए
सउंदलाए सोहग्गादेवआ अच्चणीआ॥ प्रियं॥ जुज्जइ॥ तदेव कर्मारभते॥ नेपथ्ये॥ अयमहंभोः॥ अन०॥ कर्णे
दत्वा॥ सही अदिहीणं विअ णिवेदिदं॥ प्रियं०॥ णं उडजसंणिहिदा सउंदला॥ आत्मगतं॥ अज्ज उण हिअएण अ
संणिहिदा॥ अन०॥ होदु अलं एत्तएहिं कुसुमेहिं॥ प्रस्थिते॥ नेपथ्ये॥ आः अतिथिपरिभाविनि॥ विचिंतयंती
यमनन्यमानसा तपोधनं वेत्सि न मामुपस्थितं॥ स्मरिष्यति त्वां न स बोधितोपि सन्कथां प्रमत्तः प्रथमं कृतामिव॥
॥१॥ प्रियं॥ हद्धि हद्धि अप्पिअं एव्व संवुत्तं॥ कस्सिं वि पूआरुहे अवरद्धा सुण्णहिअआ सउंदला॥ पुनर्विलोक्य॥ ॥२६॥
ण हु जस्सिं कस्सिं वि एसो दुव्वासो सुलहकोवो महेसि॥ तह सविअ वेअचलफुल्लदुघाराए गईए पडिणिवुत्तो को अ

ण्णो हुदवहादो दहिदुं पहविस्सदि॥ अन०॥ गच्छ पादेसु पणमिअ णिवत्तेहि णं जाव अग्घोदअं उवकप्पेमि॥ प्रि
यं॥ तहत्ति निष्क्रांता॥ अन०॥ पदांतरे स्खलितं निरूप्य॥ अम्मो आवेअक्खलिदाए गईए पब्भट्ठं मम अग्गह
त्थादो पुप्फभाअणं॥ पुष्पावचयं निरूपयति॥ प्रविश्य॥ प्रियंवदा॥ सहि पकिदिवक्को सो कस्स अणुणअं पडिग
ण्हदि किं वि उण साणुक्कोसो किदो॥ अन०॥ सस्मितं॥ तस्सिं बहु एदं पि कहेहि॥ प्रियं०॥ जदा णिवत्तिदुं ण इच्छदि
तदा विण्णविदो मए॥ भअवं पढमं त्ति पेक्खिअ अविण्णादतवप्पहावस्स दुहिदुजणस्स भअवदा एक्को अवराहो म
रिसिदव्वोत्ति॥ अन०॥ तदो तदो॥ प्रियं॥ तदो मे वअणं अण्णहा भविदुं णारुहदि किंदु अहिण्णाणाभरणदंस
णेण सावो णिवत्तिस्सदि त्ति मंतअंतो स अंतरिहिदो॥ अन०॥ संक्कदाणीं समस्ससिदुं अत्थि तेण राएसिणा
संपत्थिदेण सणाममुद्दिअं किदं अंगुलीअअं स्मरणीअं त्ति सअं पिणिद्धं तस्सिं साहिणोपाआ सउंदला भविस्सदि

॥ना॰ शा॰ प्रियं॰॥ सहि एहि देवकज्जं दाणिं णिवत्तेम्ह॥ परिक्रामतः॥ प्रियं॥ विलोक्य॥ अणसूए पेक्ख दाव वामहत्थोपहिदवअ अं॰ ४
॥२७॥ णा आलिहिदा विअ पिअसही भत्तुगदाए चिंताए अत्ताणंपि ण एसा विभावेदि किं उण आअंतुअं॥ अन॰॥ पिअंव
देदु वेणं एव्व णो मुहे एसो वुत्तंतो चिट्ठदु॥ रक्खिदव्वा खु पकिदि पेलवा पिअसही॥ प्रियं॥ को दाणिं उण्होदएण णोमा
लिअं सिंचेदि॥ निष्क्रांते॥ विष्कंभकः॥ ततः प्रविशति सुप्तोत्थितः शिष्यः॥ शिष्यः॥ वेलोपलक्षणार्थमादिष्टोस्मि
तत्रभवता प्रवासादुपावृत्तेन काश्यपेन॥ प्रकाशं॥ निर्गतस्तावदालोकयामि कियदवशिष्टं रजन्या इति परिक्रम्यावलो
क्य च॥ हंत प्रभातं॥ तथाहि॥ यात्येकतोस्तशिखरं पतिरोषधीनामाविष्कृतारुणपुरस्सर एकतोर्कः॥ तेजोद्वयस्य युग
पद्व्यसनोदयाभ्यां लोको नियम्यत इवात्मदशांतरेषु॥ २॥ अपि च॥ अंतर्हिते शशिनि सैव कुमुद्वती मे दृष्टिं न नंदय शकुं
ति संस्मरणीयशोभा॥ इष्टप्रवासजनितान्यबलाजनस्य दुःखानि नूनमतिमात्रसुदुःसहानि॥ ३॥ प्रविश्य पटाक्षेपे २७

णानुसूया॥ अन॰॥ जइ वि विसअपरंमुहस्स विजणस्स एदं ण विदिदं तह वि तेण रण्णा सउंदलाए अणज्जं आ
अरिदं॥ शिष्यः॥ यावदुपस्थितां होमवेलां गुरवे निवेदयामीति निष्क्रांतः॥ अनसूया॥ पडिवुद्धा वि किं करिस्सं
ण मे उइदेसु वि णिअकरणीज्जेसु हत्थपाया पसरंदि॥ कामो दाणिं सकामो होदु॥ जेण असच्चसंधे जणे सुद्धहि
अआ सही पदं कारिदा॥ अहवा दुव्वाससो कोवो एसो विआरेदि॥ अण्णहा कहं सो राएसी तारिसाणि मंतिअ एत्तिअ
स्स कालस्स लेहमेत्तंवि ण विसज्जेदि॥ ता इदो अहिण्णाणं अंगुलीअअं से विसज्जेम्ह॥ दुःखसीले तवस्सिजणे
को अब्भत्थीयदु एवं सहीगामी दोसोत्ति ववसिदा वि ण पारेमि पवासपडिणिवुत्तस्स तादकण्णवस्स दुस्संत
परिणीदं आवण्णसत्तं सउंदलं णिवेदिदुं॥ इत्थंगदे अम्हेहिं किं करणिज्जं॥ प्रविश्य॥ प्रियं॥ सहर्षं॥ सहि तु
वरस सउंदलाए पत्थाणकोदुअं णिव्वत्तिदुं॥ अन॰॥ सहि कहं एदं॥ प्रियं॥ सुणाहि दाणिं सुहसइदपुच्छिआ सउ

॥ना०शा० दत्तास आसंगदस्मि ॥ अन० ॥ तदो प्रियं ॥ दाव एदं लज्जावणदमुहिं परिसज्जिअ सअं तादकस्सवेन एव्वं अहिणंदि अ०४

॥२९॥ दं ॥ दिठ्ठिआ धूमाउलिददिठ्ठिणो विजमाणस्स पावए एव्व आहुदी पडित्ता ॥ वच्छे सुसिस्सपरिदिण्णा विअ वि

ज्जा असोअणिज्जा संवुत्ता ॥ अज्ज एव इसिपरिरक्खिदं तुमं भत्तुणो सआसं विसज्जेमि त्ति ॥ अन० ॥ अह केण सू

इदो तादकस्सवस्स वुत्तंतो ॥ प्रियं ॥ अग्गिसरणं पविठ्ठस्स सरीरं विणा छंदोमईए वाआए ॥ अन० ॥ सविस्मयं ॥

कहेहि ॥ प्रियं ॥ संस्कृतमाश्रित्य ॥ दुष्यंतेनाहितं तेजो दधानां भूतये भुवः ॥ अवेहि तनयां ब्रह्मन्नग्निगर्भां श

मीमिव ॥४॥ अन० ॥ प्रियंवदामाश्लिष्य ॥ सहि पिअं मे किं दु अज्ज एव्व सउंदला णिज्जादि त्ति उक्कंठासाहार

णं परितोसं अणुहोमि ॥ प्रियं ॥ सहि वअं दाव उक्कंठा विनोदइस्सामो सा तवस्सिणी णिव्वुदा होदु ॥ अन० ॥

तेण हि एदस्सिं चूदसाहावलंबिदणालिएरसमुग्गाए तंणिमित्तं एव्व कालंतरक्खमा णिक्खित्ता मए केस ॥२९॥

रमालिआ ताइ मं हत्थसंणिहिदं करेहि । जाव अहं पि से मिअलोअणं तित्थमित्तिअं दुव्वाकिसलयाणि त्ति मंगलस

मालंभणाणि विरएमि । प्रियं० । तह करिअदु ॥ अनसूया निष्क्रांता । प्रियंवदा नाट्येन सुमनसो गृह्णाति ॥ नपथ्ये । गौतमि

आदिश्यतां शार्ङ्गरवमिश्राः शाकुंतलानयनाय । प्रियं० । कण्णं दत्वा ॥ अणसूए तुवर तुवर एदे हत्थिणाउरगामिणो

इसिओ सद्दावअंति । प्रविश्य समालंभनहस्ता अनसूया । सहि एहि गच्छ । ह्म । परिक्रामतः ॥ प्रियं० ॥ विलोक्य ॥ एसा

सुज्जोदए एव्व सिहामज्जिदा पडिच्छिदणीवारहत्थाहिं सोत्थिवाअणकाहिं तावसीहिं अहिणंदिअमाणा सउंदला

चिठ्ठइ । उवसप्पाम णं ॥ उपसर्पतः ॥ ततः प्रविशति यथोद्दिष्टव्यापारा आसनस्था शाकुंतला ॥ शाकुंतलां प्रति तापसीना

मन्यतमा ॥ जादे भत्तुणो बहुमा[illegible]होहि एणस्सं अं महादेवेसद्दं लहेहि ॥ द्वितीया ॥ वच्छे वीरप्पसविणी होहि ॥ तृतीया ॥ व

च्छे भत्तुणो बहुमदा होहि ॥ इत्याशिषो दत्वा गौतमीवर्जं निष्क्रांताः ॥ सख्यौ ॥ उपसृत्य ॥ सहि सुहमज्जणं दे होदु ॥ शाकुं०

सायंसमेसहिएणंइहोएिासीदहु॥उभे॥मंगलयात्राणयाहायोपविश्य॥हलासज्जास्तिोहि॥जावमंगलसमाजणंखिरएम॥शाकुं०

इदंपिबहुमंतवंडुल्लहंहराणिमेसहीमंडणंभविस्सदित्ति॥बाष्पंविसृजति॥उभे॥सहिउइदंणभिहेमंगलकालेरोइदुं॥अश्रू
णिप्रमृज्यनाट्येनप्रसाधयतः॥प्रियं०॥आरौहुरणोइदंरूवंअस्समसुलहेहिंपसाहणेहिंविप्पयारिअदि॥प्रविश्योपा
यनहस्तावृषिकुमारौ॥उभौ॥इदमलंकरणमलंक्रियतामत्रभवती॥सर्वाविलोक्यविस्मिताः॥गौतमी॥वत्सणाअरकु
दोएदं॥प्रथमः॥तातकाश्यपप्रसादात्॥गौतमी॥किंमाणसीसिद्धी॥द्वितीयः॥नखलुश्रूयतां॥तत्रभवतावयमाज्ञप्ताः
शाकुंतलाहेतोर्वनस्पतिभ्यःकुसुमान्याहरतेतिततइदानीं॥क्षौमंकेनचिदिंदुपांडुतरुणामांगल्यमाविष्कृतंनिष्ठ्यूतश्च
रणोपभोगसुलभोलाक्षारसःकेनचित्॥अन्येभ्योवनदेवताकरतलैरापर्वभागोत्थितैर्दत्तान्याभरणानितत्किसलयो
द्भेदप्रतिद्वंद्विभिः॥५॥प्रियं०॥शाकुंतलांव्रीडांरूपयति॥प्रथमः॥गौतमएह्येहि॥अभिषेकोत्तीर्णायकाश्यपायवनस्पति

सेवांनिवेदयामि॥द्वितीयः॥तथेतिनिष्क्रांतौ॥सख्यौ॥अवदाअणुवजुत्तभूसणोअअंजणो॥विलोक्य॥हलाइमाएअभ्भु
ववत्तीएभत्तुणोगहे॥अणुहोदव्वाराअलच्छीति॥चित्तकम्मपरिअएणअंगेसुदेआहरणविणिओअंकरेह्म॥शा
कुं०॥जाणेवोणिउणं॥उभे॥नाट्येनालंकुरुतः॥ततःप्रविशतिस्नानोत्तीर्णःकाश्यपः॥काश्यपः॥यास्यत्यद्यशाकुंतले
तिहृदयंसंस्पृष्टमुत्कंठयाकंठस्तंभितबाष्पवृत्तिकलुषश्चिंताजडंदर्शनं॥वैक्लव्यंममतावदीदृशमिदंस्नेहादरण्यौकसः
पीड्यंतेगृहिणःकथंनुतनयाविश्लेषदुःखैर्नवैः॥६॥परिक्रामति॥सख्यौ॥हलासउंदलेअवसिदमंडणासिपरिधेहिसप
दंखोमजुअलं॥शाकुंतलोत्थायपरिधत्ते॥गौतमी॥जादेएसदेआणंदपरिवाहिणाचक्खुणापरिस्सजंतोविअगुरुअ
वहुदो॥आआरंदावयपडिवज्ज॥शाकुं॥सव्रीडं॥तादवंदामि॥काश्यपः॥वत्से॥ययातेरिवशर्मिष्ठाभर्त्तुर्बहुमताभव॥
सुतंत्वमपिसम्राजंसेवपूरुमवाप्नुहि॥७॥गौत०॥भगवंवरोखुएसोणआसिसा॥काश्यपः॥इत्थंछंदसाऽऽग्नीस्त॥अ

अंध

शा॰ना॰ मीवेदिंपरितःकॢप्तधिष्ण्याःसमिद्वंतःप्रांतसंस्तीर्णदर्भाः॥अपघ्नंतोदुरितंहव्यगंधैर्वैतानास्त्वांवह्नयःपावयंतु॥९॥
॥३०॥ प्रतिष्ठस्वेदानीं॥सदृष्टिक्षेपंक्कतेशार्ङ्गरवमिश्राः॥प्रविश्यशिष्याः॥भगवन्निमेस्मः॥काश्यपः॥भगिन्यास्तेमार्गमादेश
य॥शार्ङ्गरवः॥इतइतोभवती॥सर्वेपरिक्रामंति॥काश्यपः॥भोभोःसन्निहितास्तपोवनतरवः॥पातुंनप्रथमंव्यवस्य
तिजलंयुष्मास्वपीतेषुयानादत्तेप्रियमंडनापिभवतांस्नेहेनयापल्लवं॥आद्येवःकुसुमप्रसूतिसमयेयस्याभवत्यु
त्स वःसेयंयातिशकुंतलापतिगृहंसर्वैरनुज्ञायतां॥[redacted]॥कोकिलारवंसूचयित्वा॥अनुमतगमनाशकुंतलातरु
भिरियंवनवासबंधुभिः॥परभृतविरुतंकलंयथाप्रतिवचनीकृतमेभिरीदृशं॥१०॥आकाशे॥रम्यांतरःकमलिनी
हरितैःसरोभिश्छायाद्रुमैर्नियमितार्कमयूखतापः॥भूयात्कुशेशयरजोमृदुरेणुरस्याःशांतानुकूलपवनश्चशि
वश्चपंथाः॥११॥सर्वेसविस्मयमाकर्णयंति॥गौतमी॥जादेणादिजणसिणिद्धाहिंअणुणादगमणासितवो ॥३०॥

वणदेवआहिंपणमसुजणंअज्जवदीणं॥शाकुं०॥सप्रणामंपरिक्रम्य॥जनांतिकं॥हलापिअंवदेणंअज्जउत्तदंसणोस्सुआ
एविअस्समंपरिच्चअंतीएदुःखदुःखेणणमेचलणापुरोप्पवट्टंति॥प्रियं०॥णकेवलंतवोवणविरहकादरासहीएव्वतु
एउवट्ठिदविओअस्सतवोवणस्सविदावसमवत्थादीसदि॥उग्गलिअदब्भकवलामिईओपरिच्चत्तणच्चणामोरा
ओसरिअपंडुपत्तामुअंतिअस्सूणिविअलदाओ॥१२॥शाकुं०॥स्मृत्वा॥तादलदाभइणिअंवणजोसिणिंदावआ
मंतइस्सं॥काश्यपः॥अवैमितेतस्यांसोदर्यस्नेहं॥इयंतावद्दक्षिणेन॥शाकुं०॥लतामुपेत्य॥वणजोसिणिँदह चू
संगदाविमंपच्चालिंगइइदोगदाहिंसाहाबाहूहिं॥अज्जप्पहुदिदूरपरिवत्तिणीदेखुभविस्सं॥२॥काश्यपः॥संकल्पितं
प्रथममेवमयातवार्थेभर्तारमात्मसदृशंसुकृतैर्गतात्वं॥चूतेनसंश्रितवतीनवमालिकेयमस्यामहंत्वयिचसंप्र
तिवीतचिंतः॥१३॥इतःपंथानंप्रतिपद्यस्व॥शाकुं०॥सख्यौप्रति॥हलाएसादुवेणंवोहत्थेणिक्खिवा॥उभे॥अअं

जणोकस्स हत्थे समप्पिदो॥ बाष्पं विहरतः॥ काश्यपः॥ अनसूये अलं रुदित्वा ननु भवतीभ्यामेव स्थिरीकर्त्तव्या श
॥३१॥ कुंतला॥ सर्वे परिक्रामंति॥ शाकुं०॥ ताद एसा उउजपज्जंतचारिणी गब्भमंथरा मिअवहू जदा अणघप्पसवा हु
इस्सदि तदा मे कं पि पिअणिवेदइत्तअं विसज्जइस्सह॥ काश्यपः॥ यस्यत्वयाव्रणविरोहणनेदं विस्मरिष्यामः॥ श
कुंतला गतिभंगं रूपयित्वा॥ को एसु खु एसो वसणे मे सज्जइ॥ परावर्त्तते॥ काश्यपः॥ वत्से॥ यस्य त्वया व्रणविरोह
णमिंगुदीनां तैलं न्यषिच्यत मुखे कुशसूचिविद्धे॥ श्यामाकमुष्टिपरिवर्द्धितको जहाति सोयं न पुत्रकृतकः पदवीं मृगस्ते
॥१४॥ शाकुं०॥ वच्छ किं सहवासपरिच्चाइणीं मं अणुसरसि॥ अचिरप्पसूदाए जणणीए विणा विवड्ढिदो एव्व दाणिं पि म
ए विरहिदं तुमं तादो चिंतइस्सदि॥ णिवत्तेहि दाव॥ रुदंती प्रस्थिता॥ काश्यपः॥ उत्पक्ष्मयोर्नयनयोरुपरुद्धवृत्तिं बा
ष्पं कुरु स्थिरतया विरतानुबंधं॥ अस्मिन्नलक्षितनतोन्नतभूमिमार्गे मार्गे पदानि खलु ते विषमीभवंती॥ १५॥ शार्ङ०

रवः॥ भगवन्नोदकांतं स्निग्धो जनोनुगंतव्य इति श्रूयते तदिदं सरस्तीरमत्र संदिश्य प्रतिगंतुमर्हसि॥ कु एवः॥ तेन हीमां
क्षीरवृक्षच्छायामाश्रयामः॥ सर्वे परिक्रम्य स्थिताः॥ काश्यपः॥ आत्मगतं॥ किं नु खलु तत्र भगवतो दुष्यंतस्य यु
क्तरूपमस्माभिः संदेष्टव्यं॥ इति चिंतयति॥ शाकुं०॥ जनांतिकं॥ हला पेक्खणलिणीपत्तंतरिदं वि सहअरं अदेक्खं
ती अदूरा चक्कवाई आरडइ दुक्करं अहं करेमि त्ति॥ अन०॥ सहि मा एवं मंतिअ एसा वि पिएण विणा गमेइ रअणिं
विसाअदीहं अरं गुरुं पि विरहदुःखं आसाबंधो सहावेदि॥ शपेकोपः॥ शार्ङरव इति त्वया मद्वचनात्स राजा श
कुंतलां पुरस्कृत्य वक्तव्यः॥ शार्ङरवः॥ आज्ञापयतु भवान्॥ काश्यपः॥ अस्मान्साधु विचिंत्य संयमधनानु
च्चैः कुलं चात्मनस्त्वय्यस्याः कथमप्यबांधवकृतां स्नेहप्रवृत्तिं च तां॥ सामान्यप्रतिपत्तिपूर्वकमियं दारेषु द
श्या त्वया भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबंधुभिः॥ १६॥ शार्ङरवः॥ गृहीतः संदेशः॥ काश्यपः॥ वत्से त्वमि

दानीमनुशासनीयासि वनौकसो ऽपि संतो लौकिकज्ञा वयं ॥ शार्ङ्ग ॥ न खलु धीमतां कश्चिदविषयो नाम ॥ काश्यपः
॥३२॥ मितः पतिकुलं प्राप्य ॥ शुश्रूषस्व गुरून्कुरु प्रियसखीवृत्तिं सपत्नीजने भर्तुर्विप्रकृतापि रोषणतया मास्म प्र
तीपं गमः ॥ भूयिष्ठं भव दक्षिणा परिजने भोग्येष्वनुत्सेकिनी यांत्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः
॥१७॥ कथं वा गौतमी ॥ एत्तिओ वहूजणस्स उवदेसो ॥ जादे एदं खु सव्वं ओधारेहि ॥ काश्यपः ॥ वत्से इमे पि प्रदेयेन
युक्तमनयोस्तत्र गंतुं त्वया सह गौतमी यास्यति ॥ शाकुं ॥ पितरमाश्लिष्य ॥ कहं दाणिं तादस्स अंकादो परिब्भट्ठा म
लअतरुमूले या चंदनलदेव देसंतरे जीविअं धारइस्सं ॥ काश्यपः ॥ वत्से किमेवं ॥ कातरासि ॥ अभिजनवतो भर्तुः
श्लाघ्ये स्थिता गृहिणीपदे विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला ॥ तनयमचिरात्प्राचीवार्कं प्रसूय च पा
वनं मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ॥१८॥ शाकु ॥ पितुः पादयोः पतति ॥ काश्यपः ॥ यदिच्छामि ते तदस्तु ॥ शाकु ॥

सखीवुपेत्य ॥ हला दुवे वि मं सममेव परिस्सजह ॥ सख्यौ तथा कृत्वा ॥ सहि जइ णाम सो राआ पच्चभिण्णाणमंथरो भवे तदो
से इमं अत्तणामहेअंकिअं अंगुलीअअं दंसेहि ॥ शाकु ॥ इमिणा संदेहेण वो आकंपिदह्मि ॥ उभे ॥ मा भाआहि सिणेहो
ह्रो पावसंकी ॥ शार्ङ्गरवः ॥ युगांतरमारूढः सविता त्वरतां भवती ॥ शाकु ॥ आश्रमाभिमुखी स्थित्वा ॥ ताद कदा णु भू
ओ तवोवणं पेक्खिस्सं ॥ काश्यपः ॥ श्रूयतां ॥ भूत्वा चिराय चतुरंतमहीसपत्नी दौष्यंतिमप्रतिरथं तनयं निवेश्य ॥ भर्त्रा तद
र्पितकुटुंबभरेण सार्द्धं शांते करिष्यसि पदं पुनराश्रमे ऽस्मिन् ॥१९॥ गौतमी ॥ जादे परिहीअदि गमणवेला णिवत्तेहि पि
दरं ॥ अहवा चिरेण वि पुणो पुणो एसा एव्वं मंतइस्सदि णिवत्तेदु भअवं ॥ काश्यपः ॥ वत्से उपरुध्यते तपो ऽनुष्ठानं ॥ शाकु ॥ भू
यः पितरमाश्लिष्य तवच्चरणपिडिदं तादस्स सरीरं ता मा अदिमेत्तं मम किदे उक्कंठिदुं ॥ काश्यपः ॥ सनिश्वासं ॥ शम
मेष्यति कुलं शोकः कथं नु वत्से त्वया रचितपूर्वं ॥ उटजद्वारविरूढं नीवारबलिं विलोकयतः ॥२०॥ गच्छ शिवाश्च

तेपंथानःसंतु ते॥ निष्क्रांता शाकुंतला सख्यापि नश्च॥ सख्यौ शाकुंतलां विलोक्य॥ हद्धिहद्धि अंतलिहिदा सउंदला
॥श्री॥ वनराइए॥ काश्यपः॥ सनिश्वासं॥ अनसूये गतवती वां सहधर्मचारिणी॥ निगृह्य शोकमनुगच्छतं मां प्रस्थि
तं॥ उभे॥ ताद सउंदलाविरहिदस्सु सुण्णं विअ तवोवणं कहं पविसामो॥ काश्यपः॥ स्नेहवृत्तिरेवं दर्शिनी॥ सवि
मर्शं॥ परिक्रम्य॥ हंत भो शाकुंतलां पतिकुलमुत्सृज्य लब्धमिदानीं स्वास्थ्यं॥ कुतः॥ अर्थो हि कन्या परकी
य एव तामद्य संप्रेष्य परिग्रहीतुः॥ जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवांतरात्मा॥ २१॥ इति निष्क्रां
ताः सर्वे॥ इति शाकुंतले नाटके चतुर्थोंकः॥ ४॥ ततः प्रविशत्यासनस्थो राजा विदूषकश्च॥ विदू॰॥ कण्णं दत्वा
भो भो वयस्स संगीदसालंतरे अवधाणं देहि कलविसुद्धाए गीदीए सरसंजोओ सुणीअदि जाणे तत्तहोदी हंसव
दीआ वस्स परिअअं करेदि त्ति॥ राजा॥ तूष्णीं भव यावदाकर्णयामि॥ आकाशे गीयते॥ अहिणवमहुलोलुवो तु
॥श्री॥

मं तह परिचुंबिअ चूअमंजरीं॥ कमलवसइमेत्तणिव्वुदो महुअर विह्मरिदो सि णं कहं॥ १॥ राजा॥ अहो रागपरिवाहिनी
अ गीतिः॥ विदू॰॥ किं दाव गीदीए अवगदो अक्खरत्थो॥ राजा॥ स्मितं कृत्वा॥ सकृत्कृतप्रणयोयं जनः॥ तदस्या देवीं वसु
मे मतीमंतरेण महदुपालंभं गतोस्मि॥ सखे माढव्य मद्वचनादुच्यतां हंसपदिका निपुणमुपालब्धोस्मीति॥ विदू॰॥ ज
१९ भवं आणवेदि॥ उत्थाय॥ भो वयस्स तए हत्थेहिं सिहंडए ताडिअमाणस्स अच्छराए वीदराअस्स विअ णत्थि दाणिं मे
मोक्खो॥ राजा॥ गच्छ नागरिकवृत्त्या संज्ञापयैनां॥ विदू॰॥ का गई निष्क्रांतः॥ राजा॥ आत्मगतं॥ किं नु खलु गीता
र्थमाकर्ण्येष्टजनविरहादृते पि बलवदुत्कंठितोस्मि॥ अथवा॥ रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्पर्यु
त्सुकी भवति यत्सुखितोपि जंतुः॥ तच्चेतसा स्मरति नूनमबोधपूर्वं भावस्थिराणि जननांतरसौहृदानि॥ २॥ प
र्याकुलस्तिष्ठति॥ ततः प्रविशति कंचुकी॥ अहो नु खल्वीदृशीमवस्थां प्रतिपन्नोस्मि॥ आचार इत्यवहितेन मया

गृहीतायावेत्रयष्टिरवरोधगृहेषु राज्ञः॥ कालेगते बहुतिथे ममसैवजाता प्रस्थानविक्लवगतेरवलंबनार्थं॥३॥
भोः कामंधर्मकार्यमनतिपात्यंदेवस्यतथापीदानीमेवधर्मासनादुत्थितस्यपुनरुपरोधकारिकएवशिष्यागमन
मस्मैनोत्सहे निवेदितुं॥ अथवा॥ अविश्रमोयंलोकतंत्राधिकारः॥ कुतः॥ भानुःसकृद्युक्ततुरंगएवरात्रिंदिवंगंध
वहः प्रयाति॥ शेषः सदैवाहितभूमिभारः षष्ठांशवृत्तेरपिधर्मएषः॥४॥ यावन्नियोगमनुतिष्ठामि॥ परिक्रम्याव
लोक्यच॥ एषदेवः॥ प्रजाः प्रजाःस्वाइवतंत्रयित्वा निषेवतेशांतमनाविविक्तं॥ यूथानिसंचार्यरविप्रतप्तः शीतंदिवा
स्थानमिवद्विपेंद्रः॥५॥ उपगम्य॥ जयतुजयतुदेवः॥ एतेखलुहिमवतोगिरेरुपत्यारण्यवासिनः॥ काश्यपसंदेशमा
दायसस्त्रीकास्तपस्विनः॥ संप्राप्ताः श्रुत्वादेवः प्रमाणं॥ राजा॥ सादरं किंकाश्यपसंदेशहारिणः॥ कंचुकी॥ अथकिं॥ राजा॥
तेनहिमद्वचनाद्विज्ञाप्यतामुपाध्यायः सोमरातः॥ अमीनाश्रमवासिनः श्रौतेनविधिनासत्कृत्यस्वयमेवप्रवेशयितुमर्ह

तीति॥ अहमप्यत्रतपस्विदर्शनोचितेप्रदेशेस्थितः प्रतिपालयामि॥ कंचुकी॥ यदाज्ञापयतिदेवइतिनिष्क्रांतः॥ राजा॥ उत्था
य॥ वेत्रवति अग्निशरणमार्गमादेशाय॥ प्रतिहारी॥ इदोइदोदेवो॥ राजा॥ परिक्रामति॥ अधिकारखेदंनिरूप्य
सर्वः प्रार्थितमर्थमधिगम्यसुखीसंपद्यतेजंतुः॥ राज्ञांतुचरितार्थतादुःखोत्तरैव॥ औत्सुक्यमात्रमवसाययति
प्रतिष्ठाक्लिश्नातिलब्धपरिपालनवृत्तिरेनं॥ नातिश्रमापनयनायनचश्रमाय॥ राज्यंस्वहस्तधृतदंडमिवात
पत्रं॥६॥ नेपथ्ये॥ वैतालिकौ॥ विजयतांदेवः॥ प्रथमः॥ स्वसुखनिरभिलाषः खिद्यसेलोकहेतोः प्रतिदिनमथवाते
वृत्तिरेवंविधैव॥ अनुभवतिहिमूर्ध्नापादपस्तीव्रमुष्णंशमयतिपरितापंछाययासंश्रितानां॥७॥ द्वितीयः॥ नि
यमयसिकुमार्गप्रस्थितानात्तदंडः प्रशमयसिविवादंकल्पसेरक्षणाय॥ अतनुषुविभवेषुज्ञातयः संतुनामत्व
यितुपरिसमाप्तंबंधुकृत्यंप्रजानां॥८॥ राजा॥ एतेक्लांतमनसः पुनर्नवीकृताःस्मः॥ परिक्रामति॥ प्रतीहारी॥

॥३५॥ अहिणवसंमजरणस्स सिरिओसंणिहिदहो मधेणुओ अगिसरणाणिंदो रम मारुहदु देवो ॥ राजा ॥ आरुह्य परि
जनां सावलंबी तिष्ठति ॥ वेत्रवति किमुद्दिश्य भगवता काश्यपेन मत्सकाशमृषयः प्रेषिताः स्युः ॥ किं तावद्व्रतिना
मुपोढं तपो वा विघ्नैस्तपोदूषितं धर्मारण्यचरेषु केनचिदुत प्राणिष्वसच्चेष्टितं ॥ आहोस्वित्प्रसवो ममापचरितैर्विष्टं
भितो वीरुधामित्यारूढबहुप्रतर्कमपरिच्छेदाकुलं मे मनः ॥ ९ ॥ प्रतीहारी ॥ सुअरिदणंदिणो इसिओ देवं सभाजयि
तुं आअदेति तक्केमि ॥ ततः प्रविशंति गौतमीसहिताः शकुंतलां पुरस्कृत्य मुनयः ॥ पुरश्चैषां कंचुकी पुरोहितश्च ॥ कंचुकी
इत इतो भवंतः ॥ शार्ङ्गरवः ॥ शारद्वत ॥ महाभागः कामं नरपतिरभिन्नस्थितिरसौ न कश्चिद्वर्णानामपथमपकृष्टोपि
भजते ॥ तथापीदं शश्वत्परिचितविविक्तेन मनसा जनाकीर्णं मन्ये हुतवहपरीतं गृहमिव ॥ १० ॥ शारद्वतः ॥ जाने भवा
न्पुरप्रवेशादित्थंभूतः संवृत्तः ॥ अहमपि ॥ अभ्यक्तमिव स्नातः शुचिरशुचिमिव प्रबुद्ध इव सुप्तं ॥ बद्धमिव स्वैरगति

र्जनमिह सुखसंगिनमवैमि ॥ ११ ॥ शाकुं ॥ निमित्तं सूचयित्वा ॥ अम्महे किं मे वामेदरं णअणं विप्फुरदि ॥ गौतमी ॥
जादे पडिहदं अमंगलं सुहाइं दे भत्तुकुलदेवदाओ वितरंदु ॥ परिक्रामति ॥ पुरोहितः ॥ राजानं निर्दिश्य भो भोः तपस्विनो
सावत्रभवान्वर्णाश्रमाणां रक्षिता प्रागेव मुक्तासनो वः प्रतिपालयति पश्यतैनं ॥ शार्ङ्गरवः ॥ भो महाब्राह्मण का
ममेतदभिनंदनीयं तथापि वयं चात्र मध्यस्थाः कुतः ॥ भवंति नम्रास्तरवः फलागमैर्नवांबुभिर्दूरविलंबिनो घनाः
अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणां ॥ १२ ॥ प्रतीहारी ॥ देव पसंणमुहवण्णा दीसंति ता जाणामि
विसद्धकज्जा इसिओ ॥ राजा ॥ शाकुंतलां दृष्ट्वा अथात्र भवती ॥ कास्विदवगुंठनवती नातिपरिस्फुटशरीरलावण्या ॥ मध्ये
तपोधनानां किसलयमिव पांडुपत्राणां ॥ १३ ॥ प्रतिहारि ॥ देव कुतूहलगब्भो पहिदो ण मे तक्को पसीददि णं दंसणीआ उण से आ
किदी लक्खीअदि ॥ राजा ॥ भवतु अनिर्वर्णनीयं परकलत्रं ॥ शाकुं ॥ हस्तमुरसि कृत्वा आत्मगतं ॥ हिअअ किं एवं वेवसि अज्जउत्तस्स

भावं ओधारअधीरं रावहोहि ॥ पुरोहितः ॥ पुरोगत्ना ॥ एते विधिवदर्चितास्तपस्विनः कश्चिदेषामुपाध्यायः संदेशः ॥ तं देश्रोतुम वः
र्हति ॥ राजा ॥ अवहितोस्मि ॥ ऋषयः ॥ हस्तमुद्यम्य विजयस्व राजन् ॥ राजा ॥ सर्वानभिवादये ॥ ऋषयः ॥ इष्टेन युज्यस्व ॥
राजा ॥ अपि निर्विघ्नतपसो मुनयः ॥ ऋषयः ॥ कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि ॥ तमस्तपति घर्मांशौ कथमावि
र्भविष्यति ॥ १४ ॥ राजा ॥ अर्थवान्खलु मे राजशब्दः ॥ अथ भगवन् लोकानुग्रहाय कुशली काश्यपः ॥ ऋषयः ॥ स्वाधी
नकुशलाः सिद्धिमंतः ॥ स भवंतमनामयप्रश्नपूर्वकमिदमाह ॥ राजा ॥ किमाज्ञापयति भगवान् ॥ शार्ङ्गरवः ॥ यन्मिथः स
मयादिमां मदीयां दुहितरं भवानुपायंस्त तन्मया प्रीतिमता युवयोरनुज्ञातं ॥ कुतः ॥ त्वमर्हतां प्राग्रसरः स्मृतोसि य
च्छकुंतला मूर्तिमतीव सत्क्रिया ॥ समानयंस्तुल्यगुणं वधूवरं चिरस्य वाच्यं न गतः प्रजापतिः ॥ १५ ॥ तदिदानीमापन्न
सत्वा प्रतिगृह्यतां सहधर्मचरणायेति ॥ गौतमी ॥ अज्ज किंपि वत्तुकाम म्हि ण मे वअणावसरो त्थि ॥ कहं ति ॥

णा पेक्खिदो गुरुअणो इमाए ण हु पुच्छिदो बंधुअणो ॥ एक्कैकमेव चरिदे भणामि किं एक्कमेक्कस्स ॥ शाकुं ॥ आत्मग
तं ॥ किं णु खु अज्जउत्तो भणादि ॥ राजा ॥ किमिदमुपन्यस्तं ॥ शाकुं ॥ पावओ खु वअणोवण्णासो ॥ शार्ङ्ग ॥ कथमि
दं नाम भवंतरेव सुतरां लोकवृत्तांतनिष्णाताः ॥ यतः ॥ सतीमपि ज्ञातिकुलैकसंश्रयां जनोन्यथा भर्तृमतीं वि
शंकते ॥ अतः समीपे परिणेतुरिष्यते तदप्रियापि प्रमदा स्वबंधुभिः ॥ १६ ॥ राजा ॥ किं वात्र भवती मया परिणीतपू
र्वा ॥ शाकुं ॥ सविषादमात्मगतं ॥ हिअअ संपदं दे आसंका ॥ शार्ङ्ग ॥ किं कृतकार्यद्वेषाद्धर्मं प्रति विमुखता कृता
वज्ञा ॥ राजा ॥ कुतोयमसत्कल्पनाप्रश्नः ॥ शार्ङ्ग ॥ मूर्छंत्यमी विकाराः प्रायेणैश्वर्यमत्तेषु ॥ १७ ॥ राजा ॥ विशेषेणा
धिक्षिप्तोस्मि ॥ गोतमी ॥ जादे मुहुत्तअं मा लज्ज अवणइस्सं दाव दे ओउंठणं तदो तुमं भट्टा अहिजाणिस्सदि त्ति य
थोक्तं करोति ॥ राजा ॥ शकुंतलां निर्वर्ण्य आत्मगतं ॥ इदमुपनतमेवं रूपमक्लिष्टकांति प्रथमपरिगृहीतं स्यान्न वेति व्य

वसथ॥भ्रमरइवविभातेकुंदमंतस्तुषारंनखलुचपरिभोक्तुंनैवशक्नोमिहातुं॥१८॥विचारयन्स्थितः॥प्रतीहा

री॥अहोधम्मावेक्खिदाभट्टिणोईदिसंणामसुहोवणदंरूवंदेक्खिअकोअण्णोविआरेदि॥शार्ङ्ग॰॥भोराजन्किमि
तिजोषमास्यते॥राजा॥भोस्तपोधनाश्चिंतयन्नपिनखलुस्वीकरणमत्रभवत्याःस्मरामितत्कथमिमामभिव्य
क्तसत्वलक्षणांप्रत्यात्मानंक्षेत्रिणमाशंकमानःप्रतिपत्स्ये॥शकुं॥अपवार्य॥अज्जस्सपरिणएव्वसंदेहोकुदो
दाणिंमेदूराधिरोहिणीआसा॥शार्ङ्ग॥मातावत्॥कृताभिमर्शामनुमन्यमानःसुतांत्वयानाममुनिर्विमान्यः॥
मुष्टंप्रतिग्राहयितास्वमर्थंपात्रीकृतोदस्युरिवासियेन॥२[illegible]॥शारद्वतः॥शार्ङ्गरवविरमत्वमिदानीं॥शकुंतले
वक्तव्यमुक्तमस्माभिः॥सोयमत्रभवानेवमाहदीयतामस्मैप्रत्ययप्रतिवचनं॥शकुं॥अपवार्य॥इमंअवत्थं
तरंगदेतारिसेअणुराएकिंवासुमराविदेणअत्तादाणिंमेसोअणीओत्तिववसिदं॥प्रकाशं॥अज्जउत्तइत्यर्द्धोक्तेसंस

इदेपरिणएसोसमुदाआरोपौरवणजुत्तादाणिंमेसोअणीओत्तिजुत्तंणामदेतहपुराअस्समपदेसभावउत्ताणहिअअंइ
मंजणंसमअपुव्वंपतारिअईदिसेहिंअक्खरेहिंपच्चाचक्खिदुं॥राजा॥शांतंपापं॥व्यपदेशमाविलयितुंकिमिहसेजन
नमिमंचपातयितुं॥कूलंकषेवसिंधुःप्रसन्नमंभस्तटतरुंच॥२०॥शकुं॥होदुजइपरपरिग्गहसंकिणातुएएव्वंपउत्तंता
अहिण्णाणेणइमिणातुहआसंकंअवणइस्सं॥राजा॥उदारःकल्पः॥शकुं॥मुद्रास्थानंपरामृश्य॥हद्धिअंगुलीअअसु
ण्णामेअंगुली॥सविषादंगौतमीमवेक्षते॥गौतमी॥णूणंदेसक्कावदारब्भंतरेसचीतित्थसलिलंवंदमाणाएपब्भट्ठंअंगु
लीअअं॥राजा॥सस्मितं॥इदंतत्प्रत्युत्पन्नमतिस्त्रैणमितियदुच्यते॥शकुं॥एत्थदावविहिणादंसिदंपहुत्तणंअवरंदे
कहिस्सं॥राजा॥श्रोतव्यमिदानींसंवृत्तं॥शकुं॥णंएक्कस्सिंदिअहेणोमालिआमंडवेणलिणीपत्तभाअणगअंउदअंतवहत्थे
सण्णिहिदंआसि॥राजा॥शृणुमस्तावत्॥शकुं॥तक्खणंसोमेपुत्तकिदओदीहापंगोणाममिअपोदओउवट्ठिदोतुएअअंदा

शा॰ना॰ अं॰५

॥३९॥ वपढमं पिअउत्तिं अणुअंपिणा उवछंदिदो उअएण ॥ण॥ उणदे अपरिचयादो हत्थब्भासं उवगदो पच्छा तस्सिं एव्व मिएण ग
हिदे सलिले णेण किदो पणओ तहा तुमं दुत्थ पहसिदो सि त्ति ॥ सव्वो सगंधेसु विस्ससिदि ॥ दुवे वि एत्थ आरणओ त्ति ।
राजा ॥ एवमादिभिरात्मकार्यनिवर्त्तनीनामनृतवाङ्मधुभिराकृष्यंते विषयिणः ॥ गौतमी ॥ महाभाअ णो रुहसि एवं मं
तिदुं ॥ तवोवणसंवद्धिदो अणभिण्णो अअं जणो कइदवस्स ॥ राजा ॥ तापसवृद्धे ॥ स्त्रीणामशिक्षितपटुत्वममानुषीणां
संदृश्यते किमुत याः प्रतिबोधवत्यः ॥ प्रागंतरिक्षगमनात्स्वमपत्यजातमन्यैर्द्विजैः परभृतः खलु पोषयंति ॥ २१ ॥ श
कुं ॥ सरोषं ॥ अणज्ज अत्तणो हिअआणुमाणेण पेक्खसि को दाणिं अण्णो धम्मकंचुअपवेसिणो तिणछण्णकूवो
वमस्स तव अणुकिदिं पडिवदिस्सदि ॥ राजा ॥ आत्मगतं ॥ संदिग्धबुद्धिं मां कुर्वन्नकैतव इवास्याः कोपो लक्ष्यते ॥ तथा ह्यनया ।
मय्येव विस्मरणदारुणचित्तवृत्तौ वृत्तं रहः प्रणयमप्रतिपद्यमाने ॥ भेदाद्भ्रुवोः कुटिलयोरतिलोहिताक्ष्या भग्नं शरास
॥३९॥

नमिवातिरुषा स्मरस्य ॥ २२ ॥ प्रकाशं ॥ भद्रे प्रथितं दुष्यंतस्य चरितं तथापीदं न लक्ष्यते ॥ शकुं ॥ सुट्ठु दाव अत्त सच्छंदचारिणी कि
दह्मि जा अहं इमस्स पुरुवंसस्स पच्चयेण मुहमहुणो हिअअट्ठिअ विसस्स हत्थब्भासं उवगदा ॥ पटांतेन मुखमावृत्य
रोदिति ॥ शार्ङ्ग ॥ इत्थमात्मकृतं प्रतिहृतं चापलं दहति ॥ अतः परीक्ष्य कर्त्तव्यं विशेषात्संगतं रहः ॥ अज्ञातहृदयेष्वे
वं वैरीभवति सौहृदं ॥ २३ ॥ राजा ॥ भोः किमत्र भवती प्रत्ययादेवास्मान्संयुतदोषाक्षरेण क्षिणुथ ॥ शारद्वतः ॥ सासूयं ॥
श्रुतं भवद्भिरधरोत्तरं ॥ आजन्मनः शाठ्यमशिक्षितो यस्तस्याप्रमाणं वचनं जनस्य ॥ परातिसंधानमधीय
ते यैर्विद्येति तेषांतु किलाप्तवाचः ॥ २४ ॥ राजा ॥ भोः सत्यवादिन्नभ्युपगतं तावदस्माभिरेवं किं पुनरिमामति
संधाय लभ्यते ॥ शार्ङ्ग ॥ निपातः पौरवैः प्रार्थ्यते इति न श्रद्धेयमेतत् ॥ शारद्व ॥ शार्ङ्गरव किमुत्तरोत्तरेणानुष्ठितो गुरु
संदेशः प्रतिनिवर्तामहे वयं ॥ राजानं प्रति ॥ तदेषा भवतः कांता त्यज वैनां गृहाण वा ॥ उपपन्ना हि दारेषु प्रभुता सर्वतो

मुखी॥२५॥ गौतमि गच्छाग्रतः॥ प्रस्थिताः॥ शकुं॰॥ अहं इमिणा किदवेण विप्पलद्धह्मि तुह्मेवि मं परिदेविणीं प
रिच्चह॥ अनुप्रतिष्ठते॥ गौतमी॥ स्थित्वा॥ वच्छ सारंगरव अणुगच्छदि इअं पुणो विकरुणपरिदेविणी वच्छे सउं
दलापच्चादेसपरुसे भत्तुणि किं मे पुत्ति आकरिस्सदि॥ शार्ङ॰॥ सरोषं सन्निवृत्य॥ किं पुरोभागे स्वातंत्र्यमवलंबसे॥ श
कुंतला भीता वेपते॥ शार्ङ॰॥ शकुंतले॥ यदि यथा वदति क्षितिपस्तथा त्वमसि पुंकिं पितुरुत्कलया त्वया॥ अथ तु वे
त्सि शुचिव्रतमात्मनः पतिकुले तव दास्यमपि क्षमं॥२६॥ तिष्ठ साधयामो वयं॥ राजा॥ भोस्तपस्विन् किमत्र भ
वतीं विप्रलभसे॥ कुमुदान्येव शशांकः सविता बोधयति पंकजान्येव॥ वशिनां हि परपरिग्रहसंश्लेषपराङ्मुखी इ ३ू
वृत्तिः॥२७॥ शार्ङ॰॥ यदा तु पूर्ववृत्तमन्यसंगाद्विस्मृतो भवान्तदा कथमधर्मभीरुः॥ राजा॥ भवंतमेवात्र गुरुलाघ
वं पृच्छामि॥ मूढः स्यामहमेषा वा वदेन्मिथ्येति संशयः॥ दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांसुलः॥२८॥ पुरो

हितः॥ विचार्य॥ यदि तावदेवं क्रियतां॥ राजा॥ अनुशास्तु मां भवान्॥ पुरो॰॥ अत्रभवती तावदाप्रसवादस्मद्गृहे
तिष्ठतु कुत इदमुच्यत इति चेत्॥ त्वं साधुभिरुद्दिष्टः प्रथममेव चक्रवर्तिनं पुत्रं जनयिष्यसीति॥ स चेन्मुनिदौहित्रस्तल्लक्ष नि
णोपपन्नो भविष्यति॥ अभिनंद्य शुद्धांतमेनां प्रवेशयिष्यसि विपर्यये तु पितुरस्याः समीपनयनमवस्थितमेव॥
राजा॥ यथा गुरुभ्यो रोचते॥ पुरोहितः॥ वत्सेऽनुगच्छ मां॥ शकुं॰॥ भअवदि वसुंधरे देहि मे विवरं॥ रुदंती प्रस्थिता॥
निष्क्रांता सह पुरोधसा तपस्विभिश्च॥ राजा॥ शापव्यवहितस्मृतिः शकुंतलागतमेव चिंतयति॥ नेपथ्ये॥ आश्च
र्यं॥ राजा॥ आकर्ण्य किं नु खलु स्यात्॥ प्रविश्य पुरोहितः॥ सविस्मयं॥ देवाद्भुतं खलु संवृत्तं॥ राजा॥ किमेवं॥ पुरो
हितः॥ देव परावृत्तेषु कण्वशिष्येषु॥ सा निंदंती स्वानि भाग्यानि बाला बाहूत्क्षेपं क्रंदितुं च प्रवृत्ता॥ राजा॥ किं च॥
पुरोहितः॥ स्त्रीसंस्थानं चाप्सरस्तीर्थमाराद्दुत्क्षिप्यैनां ज्योतिरेकं जगाम॥२९॥ सर्वे विस्मयं रूपयंति॥ राजा॥ भग

दि ॥५०॥ वस्त्रागपिसोस्माभिरर्थःप्रत्यर्थीश एवकिंवृथातर्केणक्लिश्यते॥विश्राम्यतुभवान्पुरोहितः॥विलोक्य॥विजय
स्वेतिनिष्क्रांतः॥राजा॥वेत्रवतिपर्याकुलोस्मिशयनभूमिमार्गमादेशय॥प्रतीहारी॥इदोइदोदेवो॥प्रस्थितः
राजा॥कामंप्रत्यादिष्टांस्मरामिनपरिग्रहंमुनेस्तनयां॥बलवद्दूयमानंप्रत्याययतीवमेचेतः॥३०॥इतिनि
ष्क्रांताःसर्वे॥इतिशाकुंतलेनाटकेपंचमोंकः॥५॥ ॥अथशकुंतलेषष्ठांकोलिख्यते॥ततःप्रविशतिनाग
रिकःश्यालःपश्चाद्बद्धंपुरुषमादायरक्षिणौच॥रक्षिणौ॥ताडयित्वा॥अलेकुंभीलआकहेहितुएएशेमणि
वद्धणुक्किस्सणामहेयेलायकीएअंगलीअएशमासादीए॥पुरुषः॥भीतिंनाटितकेन॥पशीदंतभावमिश्शेअह
केणईदिशाकम्मकाली॥प्रथमः॥किंखुशोहणेबम्हणेत्तिकलिअलण्णापडिग्गहेदिण्णे॥पुरुषः॥सुणुदाणिंअह
केशक्कावदालब्भंतलवाशीधीवले॥द्वितीयः॥पटच्चलकिम॰अम्हेहिंजादीपुच्छिदे॥श्यालः॥सुजकहेदुसव्वंअणुक्क

मेणमाणंअंतरापडिबंधह॥उभौ॥जंआवुत्तेआणवेकहेहि॥पुरुषः॥अहकेजालुग्गालादिहिंमच्छबंधणोवा
एहिंकुडुंबभलणंकलेमि॥श्यालः॥विहस्य॥विसुद्धोदाणिंआजीवो॥पुरुषः॥भट्टा॥शहजेकिलजेविणिंदि
एणहुसेकम्मविवज्जणीअके॥पशुमालणकम्मदालुणेअणुकंपामिदुद्धशोत्तिए॥१॥श्यालः॥तदो
तदो॥पुरुषः॥एक्कस्सिंदिअशेखंडशोलोहिअमच्छेमएकप्पिदे॥जावतश्शउदलब्भंतलेएदंलअणभाशुले
अंगुलीअएदेक्खिएपच्छाअहकेशेविक्कआअदंशआंतेगहिदेभावमिश्शेहिंमालेहमुंचेहवा॥अंशेआ
अमवुत्तंतो॥श्यालः॥जाणुअविश्शगंधीगोधादीमच्छबंधएव्वणिस्संसअंअंगुलीअदंसणंसेविमरिसिदव्वं
लाउलंएव्वगच्छामो॥रक्षिणौ॥तह॥श्यालः॥गच्छअलेगंडभेदअ॥सर्वेपरिक्रामंति॥श्या
लः॥सूचअइमंपुलदुवालेअप्पमत्तोपडिवालहजावइमंअंगलीअंजहागमणं

॥४१॥ भट्टिणो णिवेदिअ तदो सासणं पडिवज्जिअ णिग्गच्छामि ॥ उभौ ॥ पविसदु आवुत्तो सामिप्पसादाय ॥ निष्क्रांतः श्या
लः ॥ प्रथमः ॥ जाणुअ अचिराअदि खु आवुत्तो ॥ द्वितीयः ॥ णं अवसलोपसप्पणी आ राआणो ॥ प्रथमः ॥ जाणुअ
अफुलंति मे हत्था इमस्स वज्झस्स सुमणो पिणद्धुं ॥ पुरुषं निर्दिशति ॥ पुरुषः ॥ ण अरुहदि भावे अकालमालणे
भविदुं ॥ द्वितीयः ॥ विलोक्य ॥ एसो अम्हाणं सामी पत्तहत्थो लाअसासणं पडिच्छिअ इदोमुहो दे क्खीअदि गिद्धबली
भविस्ससि सुणो मुहं वा देक्खिस्ससि ॥ प्रविश्य श्यालः ॥ सूचअ मुंचेदु एसो जालोजीवी उववण्णो किलु अंगुली
अअस्स आअमो ॥ सूचकः ॥ जह आवुत्तो भणादि ॥ द्वितीयः ॥ एसो जमसदणं पविसिअ पडिणिवुत्तो ॥ पुरुषं प
रिमुक्तं बंधनं करोति ॥ पुरुषः ॥ श्यालं प्रणम्य ॥ भट्टा अह कीदिसो मे आजीवो ॥ श्यालः ॥ एसो भट्टिणा अंगुलीअअ
मुल्लसंमिदो पसादो दाविदो ॥ पुरुषाया र्थं प्रयच्छति ॥ पुरुषः ॥ सप्रणामं परिगृह्य ॥ भट्टके अणुग्गहीदह्मि ॥ सू

णं भणादि इमस्स करमद्धिआ भत्तुणो त्ति ॥ पुरुषमसूयया पश्यति ॥ पुरुषः ॥ भट्टा जके इदो अद्धं तुम्हाणं सुमणो मूलं हो
चकः ॥ एसो णाम अणुग्गहे जे स्स लाहो अवदालिअ हत्थिक्खंधे पडिच्छिदे ॥ जानुकः ॥ आवुत्त परितोसं कहेहि तेण दु॰ पं॰ ४
अंगुलीअएण भट्टिणो सम्मदेण होदव्वं ॥ श्यालः ॥ णं तस्सिं महारुहं रअणं भट्टिणो बहुमदं ति तक्केमि ॥
तस्स दंसणेण भट्टिणो अभिमदो जणो सुमरिदो ॥ मुहुत्तअं पकिदिगंभीरो वि पज्जुस्सुअणअणो आसी ॥
सूचकः ॥ सेविदं णाम आवुत्तेण ॥ जानुकः ॥ ण तके जुज्जइ ॥ श्यालः ॥ धीवर महत्तरो तुमं पिअवअस्सको
दाणिं मे संवुत्तो कादंबरीसक्खिअं अह्माणं पढमं सोहिदं इच्छीयदि ता सौंडिआपणं एव गच्छामो ॥ निष्क्रांताः स
र्वे ॥ ततीयः प्रवेशकः ॥ ततः प्रविशति आकाशयानेन सानुमती नामाप्सराः ॥ सानुमती ॥ णिव्वत्तिदं जं णाव
णिव्वत्तणिज्जं अच्छरातित्थसण्णिज्झं ॥ जाव साहुजणस्स अभिसेअकालो त्ति संपदं इमस्स राएसिणो
उदंतं पच्चक्खीकरिस्सं ॥ मेणआसंबंधेण सरीरभूदा मे सउंदला ताए अ दुहिदुणिमित्तं आदिट्ठपुव्वम्हि

॥५२॥ समंतादवलोक्य ॥ किं एखु उदुउछवे वि णिरुसवारंभं विअ एदं जाउलं दीयइ ॥ अत्थि मे विवोप
णिधाणेण सव्वपरिण्णादुं ॥ किंदु सहीए आदरेण मए माणइदव्वो होदु इमाणं एव उज्जाणपालिआणं तिरक्खरि
णीपडिछन्ना स्सपस्सवरिवत्तिणी भविअ उवलंभिस्सं ॥ नाट्येनावतीर्य स्थिता ॥ ततः प्रविशति चूतां
कुरमवलोकयंती चेटी अपरा च पृष्ठतस्तस्याः ॥ प्रथमा ॥ आअंवहरिअपंडुर संतमासस्स जीअसव्वसंते ॥
दिट्ठोसि चूदकोरअ उदुमंगलं तुमं पसाएमि ॥२॥ द्वितीया ॥ परहुदिए किं एआइणी मंतेसि ॥ प्रथमा ॥ मदुअरि
ए चूदकलिअं देक्खिअ उम्मत्तिआ परहुदिआ होदि ॥ द्वितीया ॥ सहर्षं त्वरयोपगम्य ॥ कहं उवट्ठिदो महुमासो
प्रथमा ॥ महुअरि एतव दाणिं कालो एसो मदविब्भमगीदाणं ॥ द्वितीया ॥ सहि अवलंब मं जाव अग्गपादट्ठिआ
भविअ चूदकलिअं गेह्णिअ कामदेवच्चणं करेमि ॥ जइ मम वि खु अद्धं अच्चणफलस्स ॥ द्वितीया ॥ अक

हिदे वि एदं संपज्जइ जदो एक्कमेव्व णो जीविदं दुधाट्ठिदं सरीरं ॥ सखीमवलंब्य स्थिता ॥ चूतांकुरं गृह्णाति ॥ अये अ
पडिवुद्धो वि चूदप्पसवो एत्थ वंधणभंगसुरभी होदि ॥ कपोतहस्तकं कृत्वा ॥ तुमं सि मए चूदंकुर दिण्णो कामस्स गहि
दधणुअस्स पहिअजणजुवइलक्खो पंचब्भहिओ सरो होदि ॥ इति चूतांकुरं क्षिपति ॥ प्रविश्य पटाक्षेपेण कुपितः
कंचुकी ॥ कंचुकी ॥ मातावदनात्मज्ञे देवेन प्रतिषिद्धे वसंतोत्सवे त्वमाम्रकलिकाभंगं किमारभसे ॥ उभे भीते ॥ पसी
ददु अज्जो अग्गहीदत्थाव अं ॥ कंचुकी ॥ न किल श्रुतं युवाभ्यां यद्वासंतिकैस्तरुभिरपि देवस्य शासनं प्रमाणीकृतं
तदाश्रयिभिः पत्रिभिश्च ॥ तथा हि ॥ चूतानां चिरनिर्गतापि कलिका बध्नाति न स्वं रजः सन्नद्धं यदपि स्थितं कुरब
कं तत्कोरकावस्थया ॥ कंठेषु स्खलितं गतेपि शिशिरे पुंस्कोकिलानां रुतं शंके संहरति स्मरोपि चकितस्तूणार्धकृष्टं श
रं ॥३॥ उभे ॥ णत्थि संदेहो महप्पहावो राएसी ॥ प्रथमा ॥ अज्ज कति दिअहाइं अम्हाणं मित्तावसुणा रट्ठिएण ण

शा॰ ना॰ ह्रिणीपायमूलं पेक्खिदाणं॥इत्थं च णो प्पमदवणस्स पालणकम्म समप्पिदं ता आअंतु दाण अस्स ऊरपुव्वो अह्लो हि णसो वुत्तं
॥५३॥ तो॥कंचुकी॥भवतु न पुनरेवं प्रवर्तितव्यं॥उभे॥अज्ज कोदूहलं णो जइ इमिणा जणेण सोदव्वं कहेदु अज्जो अंकं
णि मित्तं भट्टिणा वसंतूस्सवो पडिसिद्धो॥सानुमती॥उस्सवप्पिआ खु मणुस्सा गुरुणा काणेण होदव्वं॥कंचु॥ब
हुलीभूतमेतत्कथ्यते किमत्र भवत्योः कर्णपथं नायातं शकुंतलाप्रत्यादेशकौलीनं॥उभे॥सुदं रट्टिणो मुहादो जाव अंगु
गुलीअअदंसणं॥कंचुकी॥तेन स्वल्पं कथयितव्यं॥यदैव खलु स्वांगुलीकदर्शनादनुस्मृतं देवेन॥सत्यमूढपू
र्वा मया तत्र भवती रहसि शकुंतला मोहात्प्रत्यादिष्टा तदाप्रभृत्येव पश्चात्तापमुपगतो देवः॥तथाहि॥रम्यं द्वेष्टि
यथा पुरा प्रकृतिभिर्न प्रत्यहं सेव्यते शय्याप्रांतविवर्तनैर्विगमयत्युन्निद्र एव क्षपाः॥ दाक्षिण्येन ददाति वाचमुचि
तामंतःपुरेभ्यो यदा गोत्रेषु स्खलितं तदा भवति च व्रीडाविलक्षश्चिरं॥५॥सानुमती॥पिअं मे॥कंचुकी॥अस्मात्प्र

॥५३॥

भवतो वैमनस्यादुत्सवः प्रत्याख्यातः॥उभे॥जुज्जइ॥नेपथ्ये॥एदु एदु भवं॥कंचुकी॥कर्णं दत्वा॥अये इत एवाभिप्रवर्तते
देवः स्वकर्मानुष्ठीयतां॥उभे॥तह इति निष्क्रांते॥ततः प्रविशति पश्चात्तापसदृशवेषो राजा॥विदुषकः प्रतीहारी च॥
कंचुकी॥राजानमवलोक्य॥अहो सर्वास्ववस्थासु रमणीयत्वमाकृतिविशेषाणां॥एवमुत्सुकोपि प्रियदर्शनो देवः॥त
थाहि॥प्रत्यादिष्टविशेषमंडनविधिर्वामप्रकोष्ठार्पितं बिभ्रत्कांचनमेकमेव वलयं श्वासापरक्ताधरः॥चिंताजागरण   व
प्रतांतनयनस्तेजोगुणादात्मनः संस्कारोल्लिखितो महामणिरिव क्षीणोपि नालक्ष्यते॥२५॥सानुमती॥राजानं द
ट्ठा॥ठाणे खु पच्चादेसविमाणिदा विइमस्स किदे शउंदला किलिम्मदित्ति॥राजा॥ध्यानमंदं परिक्रम्य॥प्रथमं सा
रंगाक्ष्या प्रियया प्रतिबोधमानमपि सुप्तं॥अनुशयदुःखायेदं हतहृदयं संप्रति विबुद्धं॥६॥सानुमती॥णं इदिसा
णि तवस्सिणीए भाअधेआणि॥विदू॥अपवार्य॥लंघिदो एसो भूओ विसउं दलावाहिणा ण आणे कहं चिकि

॥५५॥ स्त्विदत्रो भविस्सदित्ति॥ कंचुकी॥ उपगम्य॥ जयतु देवः॥ महाराज प्रत्यवेक्षिताः प्रमदवनभूमयः॥ यथाकाममध्या
स्तां विनोदस्थानानि महाराजः॥ राजा॥ वेत्रवति मद्वचनादमात्यमार्यपिशुनं॥ ब्रूहि॥ चिरप्रबोधनान्न संभावित
मस्माभिर्धर्मासनमध्यासितुं यत्प्रत्यवेक्षितं पौरकार्यमार्येण तत्पत्रमारोप्य दीयतामिति॥ प्रतीहारी॥ जं देवो
आणवेदि॥ निष्क्रांता॥ राजा॥ वातायन त्वमपि स्वं नियोगमशून्यं कुरु॥ निष्क्रांतः कंचुकी॥ विदू०॥ किदं भवदा
णिम्मक्खिअं संपदं सिसिरातवच्छेअरमणीए इमस्सिं पमदवणुद्देसे अत्ताणं रमइस्ससि॥ राजा॥ वयस्य रंध्रो
पनिपातिनोनर्था इति यदुच्यते तदव्यभिचारि वचः॥ कुतः॥ मुनिसुताप्रणयस्मृतिरोधिना मम च मुक्तमिदं तम
सा मनः॥ मनसिजेन सखे प्रहरिष्यता धनुषि चूतशरश्च निवेशितः॥ ७॥ विदू०॥ चिट्ठ दाव इमिणा दंडकट्ठेण कंद
प्पवाहिं णासइस्सं॥ इति दंडकाष्ठमवलंब्य चूतांकुरं पातयितुमिच्छति॥ राजा॥ सस्मितं॥ भवतु दृष्टं ब्र

ह्मवर्चसं सखे कोपविश्य प्रियायाः किंचिदनुकारिषु लतासु दृष्टिं विलोभयामि॥ विदू०॥ णं आसण्णपडिआचउरिआ भव
दा संदिट्ठा माहवीमंडवे इमं वेलं अदिवाहिस्सं॥ तहिं च मे चित्तफलगदं सहत्थलिहिदं तत्तहोदीए सउंदलाए
पडिकिदिं आणेहित्ति॥ राजा॥ ईदृशं हृदयविनोदस्थानं तत्तमेव मार्गमादेशय॥ विदू०॥ इदो भवं॥ उभौ परिक्रामतः
सानुमत्यनुगच्छति॥ विदू०॥ एसो मणिसिलापट्टअसणाहो माहवीमंडवो उवहाररमणिज्जदाए णिस्संसअं साअ ए
देण विअ णो पडिच्छइ॥ ता पविसिअ णिसीददु भवं॥ उभौ प्रवेशं कृत्वोपविष्टौ॥ सानुमती॥ लदासंस्सिदा देक्खि
स्सं दाव सहीए पडिकिदिं॥ तदो से भत्तुणो बहुमदं अणुराअं णिवेदइस्सं॥ तथा कृत्वा स्थिता॥ राजा॥ सखे स
र्वमिदानीं स्मरामि शकुंतलायाः प्रथमवृत्तांतं कथितवानस्मि भवते च स भवान् प्रत्यादेशवेलायां मत्समीप
मुपगतो नासीत्॥ पूर्वमपि न त्वया कदाचित्संकीर्तितं तत्रभवत्या नाम कच्चिदहमिव विस्मृतवानसि त्वं॥ विदू०॥

॥४५॥ णविस्सुमरामिकिंतुसव्वंकहिअअवसाणेउणतुएपरिहासविअप्पओएसोणभूदत्थोत्तिआचक्खिअमएवि
मंदबुद्धिणातहएव्वगहिदं॥अहवाभविदव्वदाबलवदी॥सानुमती॥एव्वएदं॥राजा॥ध्यात्वा॥सखेत्रायस्वमां॥विदू
षकः॥किमेदंअणुववण्णंइदिसंतुइ॥कदाविसप्पुरिसासोअवत्तव्वाणहोंत्ति॥णंप्पवादेविणिक्कंपागिरओ॥राजा॥
वयस्यनिराकरणविक्लवायाःसमवस्थामनुस्मृत्यबलवदशरणोस्मि॥साहि॥इतःप्रत्यादेशात्स्वजनमनुगंतु
व्यवसितामुहुस्तिष्ठेत्युच्चैर्वदतिगुरुशिष्येगुरुसमे॥पुनर्दृष्टिंबाष्पप्रसरकलुषामर्पितवतीमयिक्रूरेयत्तत्सविषमि
वशल्यंदहतिमां॥८॥सानुमती॥अम्मेहेइदिसीसकज्जपरदाजंइमस्ससंदावेणअहंरमामि॥विदू॥भोअत्थिमेतत
क्कोकेणवित्तत्तहोदीआआसचारिणाणीदेत्ति॥राजा॥कःपतिदेवतामन्यःपरिमाष्टुमुत्सहेत॥मेनकाकिल
सख्यास्तेजन्मप्रतिष्ठेतिश्रुतवानस्मितत्सहचारिणीभिःसखीतेहृतेतिमेहृदयमाशंकते॥सानु०॥संमोहो

खुविम्हरणिज्जोणपडिबोहो॥विदू०॥जइएव्वंमत्थिखुसमाअमोकलेणतत्तहोदीए॥राजा॥वयस्य॥स्वप्नोनुमायानुमति
भ्रमोनुक्लिष्टंनुतावत्फलमेवपुण्यैः॥असंनिवृत्त्यैतदतीतमेतेमनोरथानामतटप्रपाताः॥९॥विदू०॥माएव्वंणंअ
गुलीअंएव्वणिदंसणंअवस्सभावीअचिंतणिज्जोसमाअमोहोदित्ति॥राजा॥अंगुलीयंविलोक्य॥अयेइदंतावद
च सुलभस्थानभ्रंशिशोचनीयं॥तवसुचरितमंगुलीयनूनंप्रतनुममेवविभाव्यतेफलेन॥अरुणनखमनोरमासुतस्या
श्च्युतमसिलब्धपदंयदंगुलीषु॥१०॥सानु०॥जइअण्णहत्थगदंभवेसच्चमेवसोअणिज्जंभवे॥विदू०॥इअंणाममुद्दाकेण
उद्देसेणतत्तहोदीएहत्थभासंपाविता॥सानु०॥ममविकोदूहलेणआआरिदोएसो॥राजा॥श्रूयतांयदास्वनगरायप्रस्थि
तंमाबाष्पंमाहकियच्चिरेणार्यपुत्रःप्रतिपत्तिंदास्यतीति॥विदू०॥तदो॥राजा॥पश्चादिमांमुद्रांतदंगुलौनिवेशयतामयाप्र
त्यभिहिता॥एकैकमत्रदिवसेमदीयंनामाक्षरंगणयगच्छसियावदंतं॥तावत्प्रियेमदवरोधगृहप्रवेशंनेताजनस्तवस

॥५६॥ मीपमुपेस्यतीति ॥११॥ तद्वदारुणात्मना मया मोहादनानुष्ठितं ॥ सानुम० ॥ रमणीओ खु अग्गही विहिणा विदूँबाहिरो सं
॥विदू० ॥ कहं धीवलकप्पीअस्स जो हि अमछस्स उदरंतरे आसी ॥ राजा ॥ शचीतीर्थं वंदमानायाः सख्यास्ते ह
स्ताद्गंगास्रोतसि परिभ्रष्टं ॥ विदू० जज्जइ ॥ सानु० ॥ अदो एव्व तवस्सिणीए सउंदलाए अधम्मभीरुणो इम
स्स राएसिणो परिणए संदेहो आसि ॥ अहवा ईदीसो अणुराओ अहिण्णाणं पेक्खदि कहं वि अ एदं ॥ राजा ॥
उपालप्स्ये तावदिदमंगुलीयकं ॥ विदूष० ॥ आत्मगतं ॥ गहिदो णेण पंथा उम्मत्ताणं ॥ राजा ॥ कथं नु तं बंधुर
कोमलांगुलिं करं विहायासि निमग्नमंभसि ॥ अथवा ॥ अचेतनं नाम गुणं न लक्षयेन्मयैव कस्मादवधीरिता प्रिया
॥१२॥ विदू० ॥ आत्मगतं ॥ कहं बुभुक्खाए खाइदव्वोम्हि ॥ राजा ॥ अकारणपरित्यक्ते ॥ अनुशायतप्तहृदयस्ताव
नुकंप्यतामयं जनः पुनर्दर्शनेन ॥ प्रविश्य पटाक्षेपेण चित्रफलकहस्ता चतुरिका ॥ इअं चित्तगदा भट्टिणि त्ति ॥ चि
॥५६॥

त्रफलकं दर्शयति ॥ विदू० ॥ साहु वयस्स महुरावत्थाणदंसणिज्जो भावाणुप्पवेसो ॥ खलदि विअ मे दिट्ठि णिण्णो
ण्णअप्पदेसेसु ॥ सानु० ॥ अहो एसा राएसिणो णिउणदा ॥ जाणे सही मे अग्गदो वट्टदि त्ति ॥ राजा ॥ यद्यत्साधु न चित्रे
स्यात्क्रियते तत्तदन्यथा ॥ तथापि तस्या लावण्यं रेखया किंचिदन्वितं ॥१३॥ सानु० ॥ सरिसं एदं पच्छादावगुरुणो सि
णेहस्स अणवलेवस्स अ ॥ विदू० ॥ भो दाणिं तिण्णि तत्तहोदीओ दीसंति सव्वा अ दंसणीआओ कदमा एत्थ तत्तहो
दी सउंदला ॥ सानु० ॥ अणभिण्णो खु ईदिसस्स रूवस्स मोहदिट्ठी अअं जणो ॥ राजा ॥ त्वं तावत्कतमां तर्कयसि ॥ विदू०
तक्केमि जा एसा सिढिलबंधवांदकुसुमेण केसंतेण उब्भिण्णसेअबिंदुणा वअणेण विसेसदो ओसरिआहिं बाहा
हिं अवसेअसिणिद्धतरुणपल्लवस्स चूअपाअवस्स पासे ईसि परिस्संता विअ आलिहिदा सा सउंदला इदरा सहि
ओ ॥ राजा ॥ निपुणो भवान् ॥ अस्त्यत्र मे भावचिह्नं ॥ स्विन्नांगुलीविनिवेशो रेखाप्रांतेषु दृश्यते मलिनः ॥ अश्रु

शा० ना० चकपोलपतितं दृश्यमिदं वर्त्तिकोच्छ्वासात्॥२४॥ चतुरिके अर्द्धलिखितमेतद्विनोदस्थानं तस्माद्गच्छ वर्तिकां तावदा
॥५७॥ नय॥ चतुरिका॥ अज्ज माढव्व अवलंब चित्तफलअं जाव आअच्छामि॥ राजा॥ अहमेवैतदवलंबे॥ यथोक्तं करो
त ति॥ निष्क्रांता चेटी॥ राजा॥ अहं हि॥ साक्षात्प्रियामुपगतामपहाय पूर्वं चित्रार्पितां पुनरिमां बहु मन्यमानः॥ स्रो
तोवहां पथि निकामजलामतीत्य जातः सखे प्रणयवान्मृगतृष्णिकायां॥२५॥ विदू०॥ आत्मगतं॥ एसो अत्तभ
वं णदीं अदिक्कमिअ मिअतिण्हिआए संवुत्तो॥ प्रकाशं॥ भो अवरं किमेत्थ लिहिदव्वं॥ सानु०॥ जो जो पदेसो सहि
ए मे अहिरूवो तं तं आलिहिदुं कामो भवे॥ राजा॥ श्रूयतां॥ कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी पा
दास्तामभितो निषण्णहरिणा गौरीगुरोः पावनाः॥ शाखालंबितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः शृंगे कृ
ष्णमृगस्य वामनयनं कंडूयमानां मृगीं॥२६॥ विदू०॥ आत्मगतं॥ जह अहं देक्खामि पूरिदव्वं णेण चित्तफलअं

लंबकुच्चाणं तावसाणं कदंबेहिं॥ राजा॥ वयस्यान्यच्च शकुंतलायाः प्रसाधनमभिप्रेतमत्र विस्मृतमस्माभिः॥
विदू०॥ किं विअ॥ सानु०॥ वणवासस्स सोउमारस्स अ विणअस्स अ जं सरिसं भविस्सदि॥ राजा॥ कृतं न कर्णार्पि
तबंधनं सखे शिरीषमागंडविलंबिकेसरं॥ न वा शरच्चंद्रमरीचिकोमलं मृणालसूत्रं रचितं स्तनांतरे॥२७॥ वि
दू०॥ भो किं णु अत्तहोदी रत्तकुवलअसोहिणा अग्गहत्थेण मुहं ओवारिअ चइदचइदा विअ ट्ठिदा॥ सावधानं निरू
प्य॥ आ दासीएपुत्तो कुसुमरसपाडच्चरो अत्तहोदीए वअणं अहिलंघदि महुअरो॥ राजा॥ ननु वार्यतामेष धृष्टः॥ वि
दू०॥ भवं एव्व अविणीदाणं सासिदा इमस्स वारणे पहविस्सदि॥ राजा॥ युज्यते॥ अपि भोः कुसुमलताप्रियाति
थे किमत्र परितपनखेदमनुभवसि॥ एषा कुसुमनिषण्णा तृषितापि सती भवंतमनुरक्ता॥ प्रतिपालयति मधुकरी न
खलु मधु विना त्वया पिबति॥२८॥ सानु०॥ अज्ज अभिजादं खु एसो वारिदो॥ विदू०॥ पडिसिद्धा वि वामा एसा जादी॥

॥५९॥ राजा॥ एवं भोन शासने तिष्ठ तिश्रूयतां तर्हि संप्रति॥ अक्लिष्टबालतरु पल्लवलोभनीयं पीतं मया सदयमेव रतोत्सवेषु॥
बिंबाधरं स्पृशसि चेद्भ्रमर प्रियाया स्त्वांकारयामि कमलोदरबंधनस्थं॥१९॥ विदू०॥ एवं तिक्खणदंडस्सादि॥ प्रहस्यात्म न
गतं॥ एसो दाव उम्मत्तो अहं वि एदस्स संगेण ईदिसवण्णो वि अ संवुत्तो॥ प्रकाशं॥ भो चित्तं खु एदं॥ राजा॥ कथंचि
त्रं॥ सानु०॥ अहं वि दाणिं अवगदत्था किं उण जहालिहिदाणुभावी एसो॥ राजा॥ किमिदमनुष्ठितं पौरवाग्रा
ग्यं॥ दर्शनसुखमनुभवतः साक्षादिव तन्मयेन हृदयेन॥ स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता कांता॥२०
वाष्पं विहरति॥ सानु०॥ पुव्वावरविरोही अपुव्वो एसो विरहमग्गो॥ राजा॥ वयस्य कथमेव विश्रांतदुःखमनु
भवामि॥ प्रजागरात्खिलीभूतस्तस्याः स्वप्ने समागमः॥ बाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि॥२१॥ सानु०॥
सव्वहा पमज्जिदं तुए पच्चादेसदुःखं सउंदलाए॥ प्रविश्य चतुरिका॥ जेदु जेदु भट्टा॥ वट्टिआकरंडअं गेण्हिअ

इदो मुहं पत्थिदह्मि॥ राजा॥ किं वा॥ चतुरिका॥ सो मे हत्थादो अंतरा तरलिआदुदिआए देवीए वसुमदीए अहमेव
अज्जउत्तस्स उवणइस्सं ति सबलक्कारं गहीदो॥ विदू०॥ दिट्ठिआ तुमं मुक्का॥ चतुरिका॥ जाव देवीए विडवलग्गं
२ उत्तरीअं तरलिआ मोचेदि दाव मए णिव्वाहिदो अत्ता॥ राजा॥ वयस्योपस्थिता देवी बहुमानगर्विता च भवानिमां
प्रतिकृतिं रक्षतु॥ विदू०॥ अत्ताणं त्ति भणाहि॥ चित्रफलकमादायोत्थाय च॥ जइ भवं अंतेउरकालकूटादो मुच्चीअ
दि ता मं मेहपडिच्छंदे पासादे सद्दावेहि॥ इति द्रुतपदं निष्क्रांतः॥ सानु०॥ अण्णसंकिअहिअओ वि अ ओ विपढमसं
भावं णं अवेक्खदि स्थितिसिढिलसोहग्गो एसो॥ प्रविश्य पत्रहस्ता प्रतिहारी॥ प्रतिहारी॥ जेदु देवो॥ राजा॥ वेत्रवतिन
खल्वंतरा दृष्टा त्वया देवी॥ प्रति॥ अह इं पत्तहत्थं मं पेक्खिअ पडिणिवुत्ता॥ राजा॥ कार्यज्ञा कार्योपरोधं मे परिहरति॥ प्रति
॥ देव अमच्चो विण्णवेदि अत्थजादस्स गणणाबहुलदाए एक्कं एव्व पोरकज्जं अवेक्खिदं तं देवो पत्तारूढं पच्चक्खीकरेदु त्ति॥

राजा॥ इतः पत्रिकां दर्शय इति प्रतीहार्युपनयति॥ राजा॥ अनुवाच्य कथं समुद्रव्यवहारी सार्थवाहो धनमित्रो नाम नौव्यसने विप
॥५९॥ न्नोनपत्यश्च किल तपस्वी राजगामी तस्यार्थसंचय इत्येतदमात्येन लिखितं॥ कष्टं खल्वनपत्यता॥ बहुधनवता बहुपत्नीके
न तत्रभवता भवितव्यं विचार्यतां यदि काचिदापन्नसत्वा तस्य भार्यासु स्यात्॥ प्रती०॥ देव दाणिं एव साकेतअस्स सेट्ठि
णो दुहिआ णिवुत्तपुंसवणा जाया से सुणीअदि॥ राजा॥ ननु गर्भः पित्र्यं रिक्थमर्हति गच्छैवममात्यं ब्रूहि॥ प्रती०॥
जं देवो आणवेदि त्ति॥ प्रस्थिता॥ राजा॥ एहि तावत्॥ प्रती॥ इअंह्मि॥ राजा॥ किमनेन संततिरस्ति नास्तीति॥ येन्यये
पा नसु वियुज्येत प्रजाः स्निग्धेन बंधुना॥ स स पापादृते तासां दुष्यंत इति घुष्यतां॥२२॥ प्रती०॥ एवं णाम घोसइदव्वं॥ निष्क्र
म्य पुनः प्रविश्य॥ काले पवुट्ठं विअ अभिणंदिदं देवस्स सासणं॥ राजा॥ दीर्घमुष्णं च निश्वस्य॥ एवं भोः संततिछेदनि
रवलंबनानां कुलानां मूलपुरुषावसाने संपदः परमुपतिष्ठंति ममाप्यंते पुरुवंशश्रीः काल इवोप्तबीजा भूरेवं वृत्ता॥

प्रती०॥ पडिहदममंगलं॥ राजा॥ धिङ्मामुपस्थितश्रेयोवमानिनं॥ सानु०॥ असंसअं सही एव्व हिअए करिअ णिंदिदो णेण
अप्पा॥ राजा॥ संरोपितेप्यात्मनि धर्मपत्नी त्यक्ता मया नाम कुलप्रतिष्ठा॥ कल्पिष्यमाणा महते फलाय वसुंधरा का
ल इवोप्तबीजा॥२३॥ सानु०॥ अपरिच्छिण्णदाणिं दे संददी भविस्सदि॥ चतु०॥ जानांतिकं॥ अये इमिणा सत्थवाहवुत्तंतेण वि
उसो॥ देओ भट्टा णं अस्ससिदुं मेहपडिछंदादो अज्जमाढव्वं गेण्हिअ आअच्छामि॥ प्रती०॥ सुट्ठु भणासि॥ इति निष्क्रां
ता॥ राजा॥ अहो दुष्यंतस्य संशयमारूढाः पिंडभाजः॥ कुतः॥ अस्मात्परं वत यथाश्रुति संभृतानि को नः
कुले निवपनानि नियच्छतीति॥ नूनं प्रसूतिविकलेन मया प्रसिक्तं धौताश्रुशेषमुदकं पितरः पिबंति॥
॥२४॥ मोहमुपगतः॥ चतु०॥ ससंभ्रममवलोक्य॥ समस्ससदु भट्टा॥ सानु०॥ हद्धि हद्धि सदि खु दीवे ववधाणदोसेण ए
सो अंधआरदोसेण एसो अंधआरदोसं अणुहोदि॥ अहं दाणिं एव्व णिव्वुदं करेमि अहवा सुदं मए सउंदलंस

॥५०॥ मस्सास अंतीरए महंदे जणणीए मुहादो जणस्स भाउस्स आदेवाए वतहं अयसुचि दिस्संति ॥ जइ अइरेण धम्म
पदिरिंभट्टा अभिरंगं दिस्सदि त्ति ताण जुत्तं कालपहिया जिदुं ॥ जाव इमिणा वुत्तंतेण पि अ सूहिं समस्सा
सेमि ॥ उद्भ्रांतकेन निक्रांता ॥ नेपथ्ये ॥ अब्बं हणं अबम्हणं ॥ राजा ॥ कर्णं दत्वा ॥ अये माढव्यस्येवार्त्तस्व
त्र रः ॥ कः कोऽत्र भोः ॥ प्रविश्य प्रतीहारी ॥ परित्तादु देवो संसअगदं वअस्सं ॥ राजा ॥ केनात्तगंधो माणवकः ॥ प्रती॰
अदिट्ठरूवेण केण वि सत्तेण अरिक्कमिअ मेहपडिच्छंदस्स पासादस्स अग्गभूमिं आरोविदो ॥ राजा ॥ उत्थाय
मा तावत् ममापि सत्वैरभिभूयंते गृहाः ॥ अथवा ॥ अहन्यहन्यात्मन एव तावत् ज्ञातुं प्रमादस्खलितं न शक्
यं ॥ प्रजासु कः केन पथा प्रयातीत्यशेषतो वेदितुमस्ति शक्तिः ॥ २४ ॥ नेपथ्ये ॥ भो वअस्स अविहर ॥ राजा ॥ गति
भेदेन परिक्रामन् ॥ सखे न भेतव्यं ॥ नेपथ्ये ॥ पुनस्तदेव पठित्वा ॥ कहं ण भाइस्सं एस मं कोवि पच्चवणद सिरोहरं

इक्खुं विअ अतिक्खण भंगं करेदि ॥ राजा ॥ सदृष्टिक्षेपं ॥ धनुस्तावत् ॥ प्रविश्य शार्ङ्गहस्ता यवनिका ॥ भट्टा एदं हत्थावापस
हिदं सरासणं ॥ राजा सशरं धनुरादत्ते ॥ नेपथ्ये ॥ एष त्वामभिनवकंठशोणितार्थी शार्दूलः पशुमिव हन्मि चेष्टमानं ॥
आर्त्तानां भयमपनेतुमात्तधन्वा दुष्यन्तस्तव शरणं भवत्विदानीं ॥ २६ ॥ राजा सरोषं ॥ कथं मामेवादिशति ॥ तिष्ठ कु
णपाशन त्वमिदानीं न भविष्यसि ॥ शार्ङ्गमारोप्य ॥ वेत्रवति सोपानमार्गमादेशय ॥ प्रती॰ ॥ सर्वे सत्वरमुपसर्पति ॥ इदो २ देवो
राजा समंतादवलोक्य ॥ शून्यं खल्विदं ॥ नेपथ्ये ॥ अविहर अहं अत्तभवंतं पेक्खामि तुमं मं ण पेक्खसि बिडालगहि
दो मूसओ विअ णिरासो म्हि जीविए संवुत्तो ॥ राजा ॥ भो तिरस्करिणी गर्वित मदीयं शस्त्रं त्वां द्रक्ष्यति एष त
मिषुं संदधे ॥ यो हनिष्यति वध्यं त्वां रक्ष्यं रक्षति च द्विजं ॥ हंसो हि क्षीरमादत्ते तन्मिश्रा वर्जयत्यपः ॥ २७ ॥
शस्त्रं च संधत्ते ॥ ततः प्रविशति विदूषकमुत्सृज्य मातलिः ॥ मातलिः ॥ कृताः शरव्यां हरिणा तवासुराः शरा

-श्री०

शा० ना०
॥५२॥

सनंतेषु विलक्ष्यतामिदं ॥ प्रसादसौम्यानि सतां सुहृज्जने पतंति चक्षूंषि न दारुणाः शराः ॥ २८ ॥ राजा ॥ शस्त्र
मुपहरन्नये मातले ॥ स्वागतं महेंद्रसारथे ॥ प्रविश्य विदूषकः ॥ अहं जेण इट्ठिपसुमारं मारिदो सो इमिणा सा शां
अदेण आहिणंदीअदि ॥ मातलिः ॥ सस्मितं ॥ आयुष्मन् श्रूयतां यदस्मि हरिणा भवत्सकाशं प्रेषितः ॥ राजा
अवहितोस्मि ॥ मातलिः ॥ अस्ति कालनेमिप्रसूतिर्दुर्जयो नाम दानवगणः ॥ राजा ॥ अस्ति श्रुतपूर्वं मया नार
दात् ॥ मात० ॥ सख्युस्ते स किल शतक्रतोरजय्यस्तस्य त्वं रणशिरसि स्मृतो निहंता ॥ उच्छेत्तुं प्रभवति यन्न स
प्तसप्तिस्तन्नैशं तिमिरमपाकरोति चंद्रः ॥ २९ ॥ स भवानात्तशस्त्र एव मिदानींतमैंद्रं रथमारुह्य विजयाय प्रति
ष्ठतां ॥ राजा ॥ अनुगृहीतोहमनया मघवतः संभावनया ॥ अथ माढव्यं प्रति भवता किमेवं प्रयुक्तं ॥ मात० ॥ तद
पि कथ्यते ॥ किंचिन्निमित्तादपि मनःसंतापादायुष्मान्मया विक्लवो दृष्टः पश्चात्कोपयितुमायुष्मंतं तथा कृतवा

॥५२॥

नस्मि ॥ कुतः ॥ ज्वलति चलितेंधनोग्निर्विप्रकृतः पन्नगः फणां कुरुते ॥ प्रायः स्वं महिमानं क्षोभात्प्रतिपद्यते हि
जनः ॥ ३० ॥ राजा ॥ जनांतिकं ॥ वयस्यानतिक्रमणीया दिवस्पते राज्ञा तत्र परिगतार्थं कृत्वा मद्वचनादमा
त्यपिशुनं ब्रूहि ॥ त्वन्मतिः केवला तावत्परिपालयितुं प्रजाः ॥ अधिज्यमिदमन्यस्मिन्कर्मणि व्यापृतं धनुः ॥ ३१ ॥
इति ॥ विदू० ॥ जं भवं आणवेदि ॥ इति निष्क्रांतः ॥ मातलिः ॥ आयुष्मन्रथमारोहतु ॥ राजा ॥ रथारोहणं ना ट
यति ॥ इति निष्क्रांताः सर्वे ॥ इति शाकुंतलनाटके षष्ठोंकः ॥ ६ ॥ ॥ अथ सप्तमोंकः ॥ ततः प्रविशत्याका
शयानेन रथारूढो राजा मातलिश्च ॥ राजा ॥ मातले अनुष्ठितनिदेशोपि मघवतः सत्क्रियाविशेषादनुपयुक्त
मिवात्मानं समर्थये ॥ मातलिः ॥ सस्मितं ॥ आयुष्मन् उभयमप्यपरितोषं समर्थये ॥ प्रथमोपकृतं मरुत्वतः प्रति
पत्त्या लघु मन्यते भवान् ॥ गणयत्यवदानविस्मितो भवतः सोपि न सत्क्रियागुणान् ॥ १ ॥ राजा ॥ मातले मा मैवं

॥५२॥ सखलु मनोरथानामप्यभूमिर्विसर्ज्जनावसरसत्कारः॥ मम हि दिवौकसां समक्षमर्द्धासनोपवेशितस्य॥ अंत
र्गतप्रार्थनमंतिकस्थं जयंतमुद्वीक्ष्यकृतस्मितेन॥ आमृष्टवक्षोहरिचंदनांका मंदारमाला हरिणा पिनद्धा॥३॥ मातलिः
किमिव नामायुष्मानमरेश्वरान्नार्हति॥ पश्य॥ सुखपरस्य हरेरुभयैः कृतं त्रिदिवमुद्धृतदानवकंटकं॥ तव शरैरधुनानत
पर्वभिः पुरुषकेसरिणश्च पुरा नखैः॥४॥ राजा॥ अत्र खलु शतक्रतोरेव महिमा स्तुत्यः॥ सिध्यंति कर्मसु महत्स्वपि य
न्नियोज्याः संभावनागुणमवेहि तमीश्वराणां॥ किं वाभविष्यदरुणस्तमसां विभेत्ता तं चेत्सहस्रकिरणो धुरि नाकरिष्य
त्॥५॥ मातलिः॥ सदृशमेवैतत्॥ स्तोकमंतरमतीत्य॥ आयुष्मन्नितः पश्य नाकपृष्ठप्रतिष्ठितस्य सौभाग्यमात्मयशसः॥ वि
च्छित्तिशेषैः सुरसुंदरीणां वर्णैरमी कल्पलतांशुकेषु॥ विचिंत्य गीतक्षममर्थजातं दिवौकसस्त्वच्चरितं लिखंति॥६॥ राजा॥
मातले सुरसंप्रहारोत्सुकेन पूर्वेद्युर्दिवमधिरोहता॥ नलक्षितः स्वर्गमार्गः कतरस्मिन्मरुतां पथि वर्त्तामहे॥ मातलिः

त्रिस्रोतसं वहति यो गगनप्रतिष्ठां ज्योतींषि वर्त्तयति च प्रविभक्तरश्मिः॥ तस्य द्वितीयहरिविक्रमनिस्तमस्कं वायो
रिमं परिवहस्य वदंति मार्गं॥७॥ राजा॥ मातले ऽतः खलु सबाह्यांतःकरणो ममांतरात्मा प्रसीदति॥ रथांगमवलो
क्य मेघपदवीमवतीर्णौ स्वः॥ मात०॥ कथमवगम्यते॥ राजा॥ अयमरविवरेभ्यश्चातकैर्निष्पतद्भिर्हरिभिरचि
रभासां तेजसा चानुलिप्तैः॥ गतमुपरि घनानां वारिगर्भोदराणां पिशुनयति रथस्ते शीकरक्लिन्ननेमिः॥८॥ मात०॥
क्षणादायुष्मान्स्वाधिकारभूमौ वर्त्तिष्यते॥ राजा॥ अधोवलोक्य वेगावतरणाश्चर्यदर्शनः संलक्ष्यते मनुष्यलोकः॥ र
तथाहि॥ शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी पर्णस्वांतरलीनतां विजहति स्कंधोदयात्पादपाः॥ संता
नैस्तनुभावनष्टसलिला व्यक्तिं भजंत्यापगाः केनाप्युत्क्षिपतेव पश्य भुवनं मत्पार्श्वमानीयते॥९॥ मात०॥ साधु दृष्टं॥
सबहुमानं विलोक्य॥ अहो उदाररमणीया पृथिवी॥ राजा॥ मातले कतमोयं पूर्वापरसमुद्रावगाढः कनकरसनिष्यं

शा०ना० मातलिर्हस्तेन दर्शयन्॥पं०६ अ॰
॥५३॥ ईसांधैइवमेघपरिघःसानुमानवलोक्यते॥मात०॥आयुष्मन्नेष खलु हेमकूटो नाम किंपुरुषपर्वतस्तपसां सिद्धिक्षे
त्रं॥पश्य॥स्वायंभुवान्मरीचेर्यःप्रबभूव प्रजापतिः॥सुरासुरगुरुःसोऽत्र सपत्नीकस्तपस्यति॥राजा॥तेन ह्यनति १०
क्रमणीयानि श्रेयांसि प्रदक्षिणीकृत्वा भगवंतं गंतुमिच्छामि॥मात०॥प्रथमकल्पः॥नाट्येनावतीर्णौ॥राजा॥स
विस्मयं॥उपोढशब्दा न रथांगनेमयः प्रवर्त्तमानं न च दृश्यते रजः॥अभूतलस्पर्शतया निरुंधतस्तवावतीर्णोऽपि
रथो न लक्ष्यते॥११॥मात०॥एतावानेव शतक्रतोरायुष्मतश्च विशेषः॥राजा॥मातले कतमस्मिन्प्रदेशे मारीचाश्र
मः॥हस्तेनाक्रूला॥इत आयुष्मान्॥परिक्रम्य॥दृश्यतां मत्र भवतामर्षीणां तपोवनभूमयः॥राजा॥ननु विस्मयादव
लोकयामि॥प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने तोये कांचनपद्मरेणुकपिशे धर्माभिषेकक्रिया॥ध्यानं
रत्नशिलातलेषु विबुधस्त्रीसंनिधौ संयमो यत्कांक्षंति तपोभिरन्यमुनयस्तस्मिंस्तपस्यंत्यमी॥१३॥मात०॥उत्सर्पिणी
॥५

वल्मीकार्धनिमग्नमूर्त्तिरुरसा संदष्टसर्पत्वचा कंठे जीर्णलताप्रतानवलयेनात्यर्थसंपीडितः॥अंसव्यापिशकुंतनीड
र निचितं बिभ्रज्जटामंडलं यत्र स्थाणुरिवाचलो मुनिरसावभ्यर्कबिंबस्थितः॥१२॥राजा॥नमस्ते कष्टतपसे॥मात०॥संय
तप्रग्रहं रथं कृत्वा॥महाराज एतावदिति परिवर्द्धितमंदारवृक्षं प्रजापतेराश्रमं प्रविष्टौ स्वः॥राजा॥स्वर्गादधिकतरं नि
र्वृत्तिस्थानमिदं हृदमिवावगाढोऽस्मि॥मात०॥रथं स्थापयित्वा॥अवतरत्वायुष्मान्॥राजावतीर्य॥मातले भवान्कथ
मिदानीं॥मात०॥संयंत्रितो मया रथो वयमप्यवतरामः॥तथा कृत्वा॥इत आयुष्मान्॥परिक्रम्य॥दृश्यंतामत्रभवतामृ
षीणां तपोवनभूमयः॥राजा॥ननु विस्मयादवलोकयामि॥प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने तोये कांच
नपद्मरेणुकपिशे धर्माभिषेकक्रिया॥ध्यानं रत्नशिलातलेषु विबुधस्त्रीसन्निधौ संयमो यत्कांक्षंति तपोभिरन्यमुन
यस्तस्मिंस्तपस्यंत्यमी॥१३॥मात०॥उत्सर्पिणी खलु महतां प्रार्थना॥परिक्रम्याकाशे॥अये वृद्धशाकल्य किमनुतिष्ठति भ

गवान्मारीचः॥ किं ब्रवीषि॥ दाक्षायण्या पतिव्रताधर्ममधिकृत्य पृष्टस्तस्यै महर्षिपत्नीसहितायै कथयतीति॥ राजा॥
कर्णं दत्वा॥ अये प्रतिपाल्यावसरः प्रस्तावः॥ मातलिः॥ राजानमवेक्ष्य॥ अस्मिन्नशोकवृक्षमूले तावदास्तामायुष्मान्॥
यावत्त्वामिन्द्रगुरवे निवेदयितुमन्तरान्वेषी भवामि॥ राजा॥ यथा भवान्मन्यते॥ स्थितः॥ मातलिः॥ आयुष्मन्साधयाम्यहं॥
निष्क्रांतः॥ राजा॥ निमित्तं सूचयित्वा॥ मनोरथाय नाशंसे किं वाहो स्पन्दसे वृथा॥ पूर्वावधीरितं श्रेयो दुःखं हि परिवर्त्त
ते॥१४॥ नेपथ्ये॥ मा खु चावलं करेहि॥ कहं गदो एव्व अत्तणो पकिदिं॥ राजा॥ कर्णं दत्वा॥ अभूमिरियमविनयस्य को
नु खल्वेष निषिध्यते॥ शब्दानुसारेण विलोक्य सविस्मयं॥ अये को नु खल्वयमनुवध्यमानस्तपस्विनीभ्याममबालस
त्त्वो बालः॥ अर्द्धपीतस्तनं मातुरामर्दक्लिष्टकेसरं॥ प्रक्रीडितुं सिंहशिशुं बलात्कारेण कर्षति॥१५॥ ततः प्रविशति यथा
निर्दिष्टकर्मा तपस्विनीभ्यां बालः॥ बालः॥ लेले जिंभ सिंघ दंताइं दे गणइस्सं॥ प्रथमा॥ अविणीद किं णो अपच्चणिवि ॥५

सेसाणि सत्ताणि विप्पआरेसि। हंत वट्टइ दे संरंभो। ण्णं खु इसिजणेण सव्वदमणोत्ति किदनामहेओसि॥ राजा॥ किं नु खलु
बालेऽस्मिन्नौरस इव पुत्रे स्निह्यति मे मनः॥ नूनमनपत्यता मां वत्सलयति॥ द्वितीया॥ एसा खु केसरिणी तुमं लंघे
दि जइ से पुत्तअं ण मुंचेसि॥ बालः सस्मितं॥ अम्हहे बली अं खु भीदो म्हि॥ अधरं दर्शयति॥ राजा॥ महतस्तेजसो बी
जं बालोयं प्रतिभाति मे॥ स्फुलिंगावस्थया वह्निरेधापेक्ष इव स्थितः॥१६॥ प्रथमा॥ वच्छ एदं बालमइंदअं मुंच अवरं दे
कीलणअं दाइस्सं॥ बालः॥ कहिं देहि णं॥ हस्तं प्रसारयति॥ राजा॥ कथं चक्रवर्त्तिलक्षणमप्यनेन धार्यते॥ तथा ह्यस्य॥
प्रलोभ्यवस्तुप्रणयप्रसारितो विभाति जालग्रथितांगुलिः करः॥ अलक्ष्यपत्रांतरमिद्धरागया नवोषसा भिन्नमिवैकपं
कजं॥१७॥ द्विती०॥ सुव्वदे ण सक्को वाआमेत्तेण विरमाविदुं॥ गच्छतु मे ममकेरए मक्कंडस्स इसिकुमारअस्स वण्णचित्तिदो
मित्तिआमोरओ चिट्ठदि तं से उवहर॥ प्रथमा॥ तह इति निष्क्रांता॥ बालः॥ इमिणा एव्व दाव कीलिस्सं॥ तापसी विलोक्य हस

शा॰ ना॰ अ॰ ७

॥५५॥ ति॥राजा॥स्पृहयामि खलु दुर्ललितायास्मै॥ आलक्ष्यदंतमुकुलाननिमित्तहासैरव्यक्तवर्णरमणीयवचःप्रवृत्तीन्॥
अंकाश्रयप्रणयिनस्तनयान्वहंतो धन्यास्तदंगरजसा मलिनीभवंति॥१८॥तापसी॥हादु ण मं अअं गणेदि॥पार्श्व
मवलोकयति॥को एत्थ इसिकुमाराणं॥राजानमवलोक्य॥भद्दमुह एहि दुम्मो अहत्थग्गाहेण डिंभलीलाएवाहि
अमाणं बालमइंदअं॥राजा॥उपगम्य सस्मितं॥अयि भो महर्षिपुत्र॥एवमाश्रमविरुद्धवृत्तिना संयमः किमिति ज
न्मतस्त्वया॥सत्त्वसंश्रयसुखोपि दूष्यते कृष्णसर्पशिशुनेव चंदनः॥१९॥तापसी॥भद्दमुह ण हु अअं इसिकुमा
रओ॥राजा॥आकारसदृशं चेष्टितमेवास्य कथयति॥स्थानप्रत्ययात्तु वयमेवं तर्किणः॥यथाभ्यर्थितमनुतिष्ठन्
बालस्पर्शमुपलभ्य॥आत्मगतं॥अनेन कस्यापि कुलांकुरेण स्पृष्टस्य गात्रेषु सुखं ममैव॥कां निर्वृतिं चेतसि तस्य
कुर्याद्यस्यायमंकात्कृतिनः प्ररूढः॥२०॥तापसी॰॥उभौ निर्वर्ण्य॥अच्छरिअं॥राजा॥आर्ये किमिव॥तापसी॥इम ॥५५

बालरूअस्स संवादिणी आकिदी त्ति विह्मा विदम्हि॥अपरिइदस्स वि दे अप्पडिलोमो संवुत्तो॥राजा॥
स्तेबालमुपलालयन्॥न चेन्मुनिदारकोयमथ कोस्य व्यपदेशः॥ताप॰॥पुरुवंसो॥राजा॥आत्मगतं॥कथमेका
न्वयो मम॥अतः खलु मदनुकारिणमेनमत्रभवती मन्यते॥अस्त्येतत्पौरवाणामंत्यं कुलव्रतं॥भवनेषु रसाधिकेषु पूर्वं
क्षितिरक्षार्थमुशंति ये निवासं॥नियतैकयतिव्रतानि पश्चात्तरुमूलानि गृहीभवंति तेषां॥२१॥प्रकाशं॥न पुनरा
त्मगत्या मानुषाणामेष विषयः॥ताप॰॥जह भद्दमुहो भणादि॥अच्छरासंबंधेण इमस्स जणणी एत्थ देवगुरुणो त
वोवणे पसूदा॥राजा॥अपवार्य॥हंत द्वितीयमाशाजननं॥प्रकाशं॥सा तत्रभवती किमाख्यराजर्षेः पत्नी॥ताप॰
को तस्स धम्मदारपरिच्चाइणो णाम संकित्तिदुं चिंतस्सदि॥राजा॥स्वगतं॥इयं खलु कथा मामेव लक्षीकरोति॥
यदि तावदस्य शिशोर्नामतो मातरं पृछामि॥अथवा तदनार्यः परदारव्यवहारः॥प्रविश्य मृन्मयूरहस्ता तापसी॥
सव्वदमण सउंदलावण्णं पेक्ख॥बालः॥सदृष्टिक्षेपं॥कहिं वा मे अज्जू॥उभे॥णामसादिस्सेण वंचिदो माउवच्छलो॥द्विती

या॥ वच्छ इमस्स मित्तिआमो अस्त रम्म त्तएणं देक्खत्ति भणिदासि॥ राजा॥ आत्मगतं॥ किं वा शकुंतलेत्यस्य मातुराख्या
संति पुनर्नामधेयसादृश्यान्यपि नाम मृगतृष्णिकेव नाममात्रप्रस्तावो मे विषादाय कल्प्यते॥ बालः॥ अज्जू एसो अदि
मे एसो भद्दमोरओ॥ क्रीडनकमादत्ते॥ प्रथमा॥ विलोक्य सोद्वेगं॥ अस्स हेरकखा करंडअं मणिबंधे स एण दीसइ।
राजा॥ अलमावेगेन॥ नन्वस्य सिंहशावविमर्दात्परिभ्रष्टं॥ आदातुमिच्छति॥ उभे॥ माखु एदं अविलंबिअ कहं ग।
हिदं णेण॥ विस्मयादुरोनिहितहस्ते परस्परमवलोकयतः॥ राजा॥ किमर्थं प्रतिषिद्धाः स्मः॥ प्रथमा॥ सुणादु महाराओ
एसा अवराजीदा णाम ओसही इमस्स जादकम्मसमए भअवदा मारीएण दिण्णा॥ एदं किल मादापिदरो अप्पाणं च
वज्जिअ अवरो भूमिपडिदं ण गेह्णदि॥ राजा॥ अथ गृह्णाति॥ प्रथमा॥ तदा सप्पो भविअ दंसइ॥ राजा॥ सहर्षमात्मगतं॥ क
थमिव संपूर्णमपि मे मनोरथं नाभिनंदामि॥ बालं परिष्वज्यते॥ द्वितीया॥ सुव्वदे एहि इमं वुत्तंतं णिअमव्वावुडाए सउं

दलाए णिवेदेम्ह इति निष्क्रांते॥ बालः॥ मुंच मं जाव अज्जूए सआसं गच्छामि॥ राजा॥ पुत्रक मया सह मातरमभिनंदिष्य
ति॥ बालः॥ मम खु तादो दुस्संदो ण तुमं॥ राजा॥ सस्मितं॥ एष विवाद एव प्रत्याययति॥ ततः प्रविशत्येकवेणीधरा श
कुंतला॥ विआरकाले वि पकिदित्थं सव्वदमणस्स ओसहिं सुणिअ मे ण आसा आसि अत्तणो भाअधेएसु अहवा जह
सा णुमदीए आचक्खिदं तह संभावीअदि एदं॥ राजा॥ शकुंतलां निर्वर्ण्य॥ अये सेयमत्रभवती शकुंतला यैषा॥ वसने परिधू
सरे वसाना नियमक्षाममुखी धृतैकवेणिः॥ अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहव्रतं बिभर्ति॥ २२॥ शकुं०॥ पश्चात्ता
पविवर्णं राजानं दृष्ट्वा॥ ण खु अज्जउत्तो विअ तदो को एसो दाणिं किदरक्खामंगलं दारअं मे गत्तसंसग्गेण दूसेदि॥ बालः॥ मात
रमुपेत्य॥ अज्जू एसो को वि पुरीसो मं पुत्ते त्ति आलिंगदि॥ राजा॥ प्रिये क्रौर्यमपि मे त्वयि प्रतिकूलं प्रयुक्तमनुकूलपरिणामं संवृत्तं
यदहमिदानीं त्वया प्रत्यभिज्ञातमात्मानं पश्यामि॥ शकुं॥ आत्मगतं॥ हिअअ अस्सस परिच्चत्तमच्छरेण अणुकंपिदम्हि देवेण

॥५७॥ अज्जउत्तो खु एसो॥राजा॥प्रिये॥स्मृतिभिन्नमोहतमसो दिष्ट्या प्रमुखे स्थितासि मे सुमुखी॥उपरागान्ते शशिनः समुपगता रोहि-
णीयोगं॥२३॥शाकुं०॥जेदु जेदु अज्जउत्तो इत्यर्द्धोक्ते बाष्पकण्ठी विरमति॥राजा॥सुंदरि॥बाष्पेण प्रतिषिद्धेपि जयशब्दे जितं मया
॥यत्ते दृष्टमसंस्कारपाटलोष्ठपुटं मुखं॥२४॥बालः॥अज्जू को एसो॥शाकुं०॥वच्छ दे भाअधेआइं पुच्छेहि॥राजा॥शाकुंतलायाः
पादयोः प्रणिपत्य॥सुतनु हृदयात्प्रत्यादेशव्यलीकमपैतु ते किमपि मनसः संमोहो मे तदा बलवानभूत्॥प्रबलतमसामेवंप्रा-
यः शुभेषु हि वृत्तयः स्रजमपि शिरस्यंधः क्षिप्तां धुनोत्यहिशंकया॥२५॥शाकुं०॥उट्ठेदु अज्जउत्तो णूणं मे सुअरिअप्पडिब-
धअं पुराकिदं तेसु दिअसेसु परिणाममुहं आसी॥जेण साणुक्कोसो वि अज्जउत्तो मइ विरसो संवुत्तो॥राजा॥उत्तिष्ठति॥
शाकुं०॥अह कहं अज्जउत्तेण सुमरिदो दुःखभाई अअं जणो॥राजा॥उद्धृतविषादशल्यः कथयिष्यामि॥मोहान्मया सुत-
नु पूर्वमुपेक्षितस्ते यो बाष्पबिंदुरधरं परिबाधमानः॥तं तावदाकुटिलपक्ष्मविलग्नमद्य बाष्पं प्रमृज्य विगतानुशयो भवेयं

॥२६॥यथोक्तमनुतिष्ठति॥शाकुं०॥~~विसमकिदं सेमरण~~ णाममुद्दं दट्ठुं॥अज्जउत्त एदं तं अंगुलीअअं॥राजा॥अस्मादंगुली-
योपलंभात्खलु स्मृतिरुपलब्धा॥शाकुं०॥विसमकिदं णेण जं अज्जउत्तस्स पच्चअकाले दुल्लहं आसी॥राजा॥तेन ऋतुस-
मवायचिह्नं प्रतिपद्यतां लता कुसुमं॥शाकुं०॥ण से विस्ससमि अज्जउत्तो एव्वं एण्हिं धारेदु॥ततः प्रविशति मातलिः॥दिष्ट्या धर्म-
पत्नीसमागमेन पुत्रमुखदर्शनेन चायुष्मान्वर्द्धते॥राजा॥अभूत्संपादितस्वादुफलो मे मनोरथः॥मातले न खलु विदि-
तोयमाखंडलेन वृत्तांतः स्यात्॥मातलिः॥सस्मितं॥किमीश्वराणां परोक्षं॥एत्वायुष्मान् भगवान्मारीचस्ते दर्शनं वित-
रति॥राजा॥शाकुंतले अवलंब्यतां पुत्रः त्वां पुरस्कृत्य भगवंतं द्रष्टुमिच्छामि॥शाकुं०॥हिरिआमि अज्जउत्तेण सह गुरुसमीपं
गंतुं॥राजा॥अप्याचरितव्यमभ्युदयकालेषु॥एह्येहि॥सर्वे परिक्रामंति॥ततः प्रविशत्यदित्या सार्द्धमासनस्थो मारीचः॥राजा
नमवलोक्य॥दाक्षायणि॥पुत्रस्य ते रणशिरस्यग्रयायी दुष्यंत इत्यभिहितो भुवनस्य भर्त्ता॥चापेन यस्य विनिवर्त्तितकर्म

॥५८॥ जातं तत्कोटिमत्कुलिशमाभरणं मघोनः ॥२७॥ अदितिः ॥ संभावणीअरूअभावा से आकिदी ॥ मात० ॥ अथ किं ॥ राजा ॥ आयु
ष्मन्नेतौ पुत्रप्रीतिपिशुनेन चक्षुषा दिवौकसां पितरावायुष्मंतमवलोकयतः ॥ तावुपसर्प ॥ राजा ॥ मातले एतौ ॥ प्राहुर्द्वादर
शधा स्थितस्य मुनयो यत्तेजसः कारणं भर्त्तारं भुवनत्रयस्य सुषुवे यद्यज्ञभागेश्वरं ॥ यस्मिन्नात्मभवः परोपि पुरुषश्च
क्रे भवायास्पदं द्वंद्वं दक्षमरीचिसंभवमिदं तत्स्रष्टुरेकांतरं ॥२८॥ मात० ॥ अथ किं ॥ राजा ॥ उभाभ्यामपि वासवानुजो दुष्यतः
प्रणमति ॥ मारीचः ॥ वत्स चिरंजीव पृथिवीं पालय ॥ अदितिः ॥ वच्छ अप्पडिरहो होहि ॥ शकुं० ॥ दारअसहिदा वो पादवंदणं
करेमि ॥ मारीचः ॥ वत्से ॥ आखंडलसमो भर्त्ता जयंतप्रतिमः सुतः ॥ आशीरन्या न ते योग्या पौलोमीसदृशी भव ॥२९॥ अ
दितिः ॥ जादे भत्तुणो अभिमदा होहि अवसं दीहाउ वच्छओ उहअकुलणंदणो होदु ॥ उवविसह ॥ सर्वे प्रजापतिमभि
त उपविशंति ॥ मारीचः ॥ एकैकं निर्द्दिशन् ॥ दिष्ट्या शकुंतला साध्वी सदपत्यमिदं भवान् ॥ श्रद्धा वित्तं विधिश्चेति त्रितयं त

त्समागतं ॥३०॥ राजा ॥ भगवन्प्रागभिप्रेतसिद्धिः पश्चाद्दर्शनमतो पूर्वः खलु वोनुग्रहः ॥ कुतः ॥ उदेति पूर्वं कुसुमं ततः फलं घनो
दयः प्राक्तदनंतरं पयः ॥ निमित्तनैमित्तिकयोरयं क्रमस्तव प्रसादस्य पुरस्तु संपदः ॥३१॥ मातलिः ॥ एवं विधातारः प्रसीदंति
राजा ॥ भगवन्निमामाज्ञाकरीं गांधर्वेण विवाहविधिनोपयम्य कस्यचित्कालस्य बंधुभिरानीतां स्मृतिशैथिल्यात्प्रत्या
दिशन्नपराद्धोस्मि तत्रभवतो युष्मत्सगोत्रस्य कण्वस्य पश्चादंगुलीयदर्शनादूढपूर्वां तद्दुहितरमवगतोहं तच्चित्रमिव मे
प्रतिभाति ॥ यथा गजो नेति समक्षरूपे तस्मिन्नतिक्रामति संशयः स्यात् ॥ पदानि दृष्ट्वा तु भवेत्प्रतीतिस्तथाविधो मे मनसो
विकारः ॥३२॥ मारीचः ॥ वत्स आत्मापचारशंकया संमोहोपि त्वय्यनुपपन्नः ॥ श्रूयतां ॥ राजा ॥ अवहितोस्मि ॥ मारीचः ॥
यदैवाप्सरस्तीर्थावतरणात्प्रत्यक्षवैक्लव्यां शकुंतलामादाय मेनका दाक्षायणीमुपगता तदैव ध्यानादवगतोस्मि ॥ दुर्वा
ससः शापादियं तपस्विनी सहधर्मचारिणी त्वया प्रत्यादिष्टा नान्यथेति स चायमंगुलीयकावसानः ॥ राजा ॥ सोच्छ्वासं ॥ एष व

॥ ॥५६॥ चनीयान्मुक्तोस्मि॥शाकु०॥स्वगतं॥दिट्ठिआ अकारणपच्चादेसीन अज्जउत्तो॥णहु सत्तं अत्ताणं सुमरेमि अहवा पत्तो म
एसहिसावो विरहसुण्णहिअआए एण विदिदो जदो सहीहिं संदिट्ठम्हि भत्तुणो अंगुलीअअं दंसइअब्बंति॥मारी०॥वत्से च
रितार्थासि सह धर्मचारिणं प्रति न त्वया मन्युः कार्यः॥पश्य॥शापादसि प्रतिहता स्मृतिरोधरूक्षे भर्त्तर्यपेततमसि प्रभुता तवै
व॥छाया न मूर्छति मलोपहतप्रसादे शुद्धे तु दर्पणतले सुलभावकाशा॥३३॥राजा॥भगवन्नत्र खलु मे वंशप्रतिष्ठा इति शौकं बा
हस्तेन दर्शयति॥मारी०॥तथा भाविनं चक्रवर्त्तिनमवगच्छतु भवान्॥पश्य॥रथेनानुत्खातस्तिमितगतिना तीर्णजलधिः
पुरा सप्तद्वीपां जयति वसुधामप्रतिरथः॥इहायं सत्वानां प्रसभदमनात्सर्वदमनः पुनर्यास्यत्याख्यां भरत इति लोकस्य भर
णात्॥३४॥राजा॥भवताकृतसंस्कारे सर्वमस्मिन्वयमाशास्महे॥अदितिः॥भअवं इमाए दुहिदुमणोरहसंपत्तीए कण्णोवि
दावसुदविस्थारो करीआदु दुहिदुवच्छला मेणआ इह एव्व उपचरंती चिट्ठइ॥शाकु०॥आत्मगतं॥मणोरहो रखु भणिदो भअव

दीए॥मारी०॥तपःप्रभावात्प्रत्यक्षमेव सर्वं तत्र भवतः॥राजा॥अतः खलु मामनतिक्रुद्धो मुनिः॥मारी०॥तथाप्यसौ प्रियमभिः
प्रष्टव्यः॥कोत्र भोः॥प्रविश्य शिष्यः॥भगवन्नयमस्मि॥मारी०॥गालव इदानीमेव विहायसा गत्वा मम वचनात्तत्रभवते कण
वाय प्रियमावेदय यथा पुत्रवती शकुंतला तच्छापनिवृत्तौ स्मृतिमता दुष्यंतेन प्रतिगृहीतेति॥शिष्यः॥यदाज्ञापयति भगवा
निति निष्क्रांतः॥मारी०॥वत्स त्वमपि स्वापत्यदारसहितः सख्युराखंडलस्य रथमारुह्य ते राजधानीं प्रतिष्ठस्व॥राजा॥यदाज्ञापय
ति भगवान्॥मारी०॥अपि च॥तव भवतु बिडौजाः प्राज्यवृष्टिः प्रजासु त्वमपि विततयज्ञः स्वर्गिणः प्रीणयालं॥युगशतप
रिवर्त्तानेवमन्योन्यकृत्यैर्नयतमुभयलोकानुग्रहश्लाघनीयैः॥३५॥राजा॥भगवन्यथाशक्ति श्रेयसे यतिष्ये॥मारी०॥किं ते भू
यः प्रियमुपहरामि॥राजा॥अतः परमपि प्रियमस्ति यदि हि भवान्प्रियं कर्तुमिच्छति तर्हीदमस्तु भरतवाक्यं॥प्रवर्त्ततां प्रकृ
तिहिताय पार्थिवः सरस्वती श्रुतमहती महीयसां॥ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः॥३६॥इ

॥६०॥ तिनिष्क्रांताःसर्वे॥ ॥इतिश्रीमत्कविकुलचक्रवर्त्तिकालिदासकृताभिज्ञानशाकुंतलाख्यनाटके सप्तमोंकः॥ ॥७॥श्री
संवत्सरएकोनविंशतिद्वयोः प्रवर्त्तनियेषु माघमासकृष्णपक्षस्य भानुवारयुक्त एकादश्यां विनपुरस्थेन छात्र भागरेख्यानेदं
पुस्तकमलेखि॥श्री॥